१ निरामयं॥ निरुद्वर्कं जितात्मानं जितक्रोधं सनातनं॥ १

मुनिसत्तमं। तप्यमानो तपो घोरं निराहारो जितात्मनः। लोमशो धर्मतत्त्वज्ञः सर्वशास्त्रविशारदः। दीर्घायुषं महात्मानं त्र
तैकब्रह्मसंमितं। कल्पे कल्पे गते तस्य एकलोमं व्यशीर्यते। अतो लोमशनामानं त्रिकालज्ञं महामुनिं। विनयावन
तास्ते वै उत्तुष्ठे वै परस्परं। अस्माकं भाग्यवशादेव प्राप्तोयं मुनिसत्तमः।१६। तास्तथा प्रणतान्दृष्ट्वा हृष्ट उवाच ऋषि
सत्तमः। लोमश उवाच। किमर्थमिह संप्राप्ताः कथयध्वं सकारणं।१७। मद्दर्शनगाढादगिरः स्तुवंतश्च वनं किंतु।। अस
शायं करिष्यामि भवतां यद्धितं भवेत्।१८। परोपकृतये जन्म मादृशानां न संशयः। जना ऊचुः। श्रूयतामभिधास्यामि व
यमागमकारणं।१९। संशयच्छेदनार्थाय तव संनिधिमागताः। परमयोनेपरतरस्तत्र श्रेष्ठो न विद्यते।२०। अतः का
र्यविशात्त्वाप्ताः समीपं भवतो वयं। महिष्मत्यां महाराजा सो पुत्रहीनोस्ति सांप्रतं।२१। वयं तस्य प्रजा ब्रह्मन् पुत्रव
त्तेन पालिताः। तं च पुत्ररहितं दृष्ट्वा दुःखस्मा निस्त्वं द्विजोत्तम।२२। मद्भक्तादर्शनेनैव कार्यसिद्धिर्भवेन्नृणां।। उपदेशं
वद मुने राजपुत्रो यथा भवेत्।२३। इति तेषां वचः श्रुत्वा मुहूर्तं ध्यानमास्थितः।। प्रत्युवाच मुनिर्ज्ञात्वा तस्य पूर्वज
न्म पुरातनं।२४। लोमश उवाच।। पुराजन्मनि वैश्योऽभूद्धनहीनो नृशंसकृत्। वाणिज्यकर्मनिरतो ग्रामाद्ग्रामांतरं भ्र
मन्।२५। ज्येष्ठमासि सिते पक्षे दशमीदिवसे तथा। मध्यगे द्युमणौ प्राप्तो ग्रामसीम्नि जलाशयं।।२६। कूपिकां सजलां
दृष्ट्वा जलपाने मनो दधौ। सद्यः प्रसूता सवत्सा धेनुस्तत्र समागता।२७। तृषाकुला निदाघार्त्ता तस्याः पपौ जलं सा। पि पः

५ तस्य दुःखेन दुःखिताः।। तपः कर्तुमिहायाता मतिं कुर्वा मुने श्रेष्ठ॥ तस्मा भाग्यवशाद्दृष्टो ५

३६
राज्य

वंतीं वारयित्वा तां मसौ तोयं स्वयं पपौ ॥२८॥ कर्मणस्तस्य पापेन पुत्रहीनो नृपो भवेत् । कस्यापि जन्मनः पु
ण्यं ज्ञात्वैमं कंठकं ॥२९॥ लोकाऊचुः ॥ पुण्यात्पापक्षयं यांति पुराणे श्रूयते मुने । उपदेशं कथय येन
पापक्षयो भवेत् ॥३०॥ यथा भवेत्प्रसादेन पुत्रो भवति भूपतेः ॥ लोमशउवाच ॥ श्रावणे शुक्लपक्षे पुत्रदानां
मनामतः ॥३१॥ एकादशी वांछितदा कुरुध्वं तद्व्रतं जनाः । यथाविधि यथान्यायं यथोक्तं जागरान्वितं ॥३२॥
श्रावणस्य सितपक्षे पलिताकादशी नृप । श्रीधरस्यापयेद्देवं कांतिमत्पाससमन्वितं ॥३३॥ पूजयेत्तशतप
त्रैश्च अर्घफलसकंवरं । नैवेद्यं घृतरिकाश्रेष्ठं पाडुकादीयते नघ ॥३४॥ तस्य पुण्यं सुविद्धि लं दध्वं नृपतये ज
ना । एवं कृते सुनियतं राज्ञः पुत्रो भविष्यति ॥३५॥ श्रुत्वा ते लोमशस्तस्य प्रणम्य द्विजोत्तमं । व्रजग्मुस्तान्रटत्वार
सर्वे हर्षोत्फुल्लविलोचनाः ॥३६॥ श्रावणे तु समासाद्य स्मृत्वा लोमशभाषितं । राज्ञा सह व्रतं चक्रुः सर्वे श्रद्धा
समन्विताः ॥३७॥ द्वादशी दिवसे पुण्यं दत्तं नृपतये जनाः । दत्ते पुण्ये च सा राज्ञी गर्भमाधत्त शोभनं ॥३८॥ प्राप्ते
प्रसवकाले सा सुषुवे पुत्रमूर्जितं । एवमेषा नृपश्रेष्ठ पुत्रदा नाम विश्रुता ॥३९॥ कर्तव्या सुखमीच्छद्भिरिह
लोके परत्र च ॥ श्रुत्वा माहात्म्यमेतस्या नरः पापैः प्रमुच्यते ॥४०॥ इह पुत्रसुखं प्राप्य परमं स्वर्गतिं लभेत् ॥
पठनाच्छ्रवणाद्वास्य वाजिपेयफलं लभेत् ॥४१॥ ॥इति श्रीभविष्योत्तरपुराणे श्रावणशुक्ले पुत्रदामाहात्म्यं नामः ॥
१७

३६

॥ ॥श्री॥ ॥युधिष्ठिर उवाच॥ श्रावणे कृष्णपक्षे तु किं नामैकादशी भवेत्॥ एतदिच्छाम्यहं श्रोतुं कथयस्व जना-
र्दन॥१॥ श्रीकृष्ण उवाच॥ शृणुष्वैकमना राजन् कथयिष्यामि विस्तरात्॥ अजेति नामतः प्रोक्ता सर्वपापप्रणाशि-
नी॥२॥ पूजयित्वा हृषीकेशं व्रतं तस्याः करोति यः॥ पापानि तस्य नश्यंति महापातकजान्यपि॥३॥ नातः परतरा
राजन् लोकद्वयहिताय वै॥ सत्यमुक्तं मया ह्येतन्नासत्यं मम भाषितं॥४॥ हरिश्चंद्र इति ख्यातो बभूव नृपतिः पु-
रा॥ चक्रवर्ती सत्यसंधः समस्तायाः भुवः पतिः॥५॥ कस्यापि कर्मणः प्राप्तौ राज्यभ्रष्टो बभूव सः॥ विक्रीय वनितां पु-
त्रं स्वकायं विक्रयं ययौ॥ पुल्कसस्य च दासत्वं गतो राजा स पुण्यकृत्॥ सत्यमालंब्य राजेंद्र मृतचेलापहारकः॥६॥
सोऽभवन् नृपतिश्रेष्ठो न सत्याच्चलितस्तथा॥ एवं गतस्य नृपतेर्बहवो वत्सरा गताः॥८॥ ततश्चिंतापरो राजा सब-
भूवातिदुःखितः॥ किं करोमि क्व गच्छामि निष्कृतिर्मे कथं भवेत्॥९॥ इति चिंतयतस्तस्य मग्नस्य वृजिनार्णवे॥ आ-
जगाम मुनिः कश्चित् ज्ञात्वा राजानमातुरं॥१०॥ परोपकरणार्थाय निर्मिता कर्मणा द्विजाः॥ स तं दृष्ट्वा द्विजवरं ननाम नृ-
पसत्तमः॥११॥ कृतांजलिपुटो भूत्वा गौतमस्याग्रतः स्थितः॥ कथयामास वृत्तांतमात्मनो दुःखसंयुतः॥ श्रुत्वा नृप-
तिवाक्यानि गौतमो विस्मयान्वितः॥ उपदेशं नृपतये व्रतस्यास्य ददौ मुनिः॥१२॥ मासे च श्रावणे राजन् कृष्णपक्षे-
ऽतिशोभना॥ एकादशी समायाता अजा नाम्नेति पुण्यदा॥ अस्याः कुरु व्रतं राजन् पापस्यांतो भविष्यति॥ तव भाग्य-

२७

दं वर्गदोषाः सप्तमे श्रीसमागताः ॥१५॥ दशम्यां चैव नक्तं च यत्किंचिद्विष्णुदृढव्रतः । यादश्यामेकभक्तं तु एकादश्यां तु
पोषणं ॥१६॥ एकादशदिने प्राप्ते प्रातः स्नायन्सुव्रती । स्त्रीयानियमतत्रदंतधावनपूर्वकं ॥ कांस्यमांसं मसूरांश्च च
णकान्कोद्रवांस्तथा । शाकं मधुपरान्नं च पुनर्भोजनमैथुनं ॥१८॥ एकादश्यां दंतकाष्ठं तैलस्नानं च भोजनं । दिवास्वापनं
मत्संपातादृक्ते भोगवर्जितं ॥१९॥ असत्कृत्यालापानं च हिंसा द्यूतं तथांजनं । एकादश्यां महाराज एतत् स्त्रीयां नियमांस्त
था ॥२०॥ अधर्मे भोजनं नास्ति स्त्रीसेवा चापि केशवः । धीतर्पयेत वदेवंच नियमांस्तु दिवानिशं ॥२१॥ स्वप्ने जियस्तु वि
फलं भोजनं च ग्राम्यमैथुनं । दंतान्तरविलग्नान्नं हानमस्व परमेश्वरः । एकादश्यां निराहारः स्थित्वा चैव परेहनि । भोक्ष्ये हं
पुंडरीकाक्ष शरणं मे भवाच्युतः ॥२२॥ स्नानं कृत्वा च यत्नेन नद्यादौ विमले जले । तर्पयित्वा पितृन्देवान्पूजयेत्
मधुसूदनं । स्नात्वा दिनांते रुचिरं निःफलकर्मारात्रौ च विष्णु विविधोपचारैः । सात्वा धूपेनैव दीपनैवेद्येनैव नीराजनैर्जा
गरणैश्चैव दीपैः ॥२५॥ एवमस्यादृते विप्रेण तव पापक्षयो ध्रुवं । धर्मश्रिदासुभूपहृषोत्सुक पूजयेत्ततः ॥२६॥ अग्निजि
त्मा च सहितं धुप्ये पाटलजैवरैः । अर्घ्यं पुगीफलैश्चैव नैवेद्यं गुडसूत्रेण यो । मद्भिषी दायते दानं विधायविष्णुरूपिणे
तव पुण्यप्रभावेन आगतो हं नृपात्तमः ॥२८॥ इत्येवं कथयित्वासौ मुनिरंतरत्नैर्भवेत् । अयतो राजशार्दूल प्रत्य
वायस्यव्रतस्य च ॥२९॥ यः कुर्याद्व्रतमिदं सर्वं भाक्तं यं तत्र तया नवेत् । नीत्वा एङः स्वराजासीद्व्रतस्यास्य प्रभावतः ॥३०

३०

दि

पत्न्यास्सह समायोगं पुत्रजीवनमाप सः। देवदुंदुभयो नेदुः पुष्पवर्षमभूद्दिवि। ३१। एकादश्याः प्रभावेन प्राप्य राज्यमकंटकं। स्वर्गं लेभे हरिश्चंद्रः सपुत्रः सपरिछदः। ३२ इत्थंविधं व्रतं राजन् ये के कुर्वंति नरोत्तमाः। सर्वपापविनिर्मुक्ताः। त्रिदिवं यांति ते नृपः। ३३। पठनात् श्रवणाद्राजन्नश्वमेधफलं लभेत्। ३४। ॥इति श्रीब्रह्मवैवर्त्तपुराणे श्रीकृष्णयुधिष्ठिरसंवादे श्रावणकृष्णाधर्मप्रदा एकादशीमाहात्म्यं नाम॥ १८॥ ७॥ युधिष्ठिर उ०॥ ॥नभस्य शुक्लपक्षे तु किंनामैकादशी भवेत्। को देवः को विधिस्तस्या एतदाख्याहि केशव। १। श्रीकृष्ण उ०॥ कथयामि महीपालकथामाश्चर्यदायिनीं। कथयामास तां ब्रह्मा नारदाय महात्मने। नारद उ०॥ कथयस्व प्रसादेन चतुर्मुख नमोस्तु ते। नभस्य शुक्लपक्षे तु किंनामैकादशी भवेत्। एतदिच्छाम्यहं श्रोतुं विष्णोराराधनाय वै। ब्रह्मा उवाच॥ वैष्णवोसि मुनिश्रेष्ठ साधु पृष्टं कलौ युगे। ४। नातःपरतरं किंचित् पवित्रं हरिवासरात्। पद्मानामेति विख्याता नभस्यैकादशी सिता। ५। हृषीकेशः पूज्यते यस्यां कर्त्तव्यं व्रतमुत्तमं। कथयामि तवाग्रेहं कथां पौराणिकीं शुभां। ६। यस्याः श्रवणमात्रेण महापापं क्षयं व्रजेत्। मांधाता नाम राजर्षिर्वैवस्वतवंशसंभवः। ७। बभूव चक्रवर्त्ती स सत्यसंधः प्रतापवान्। धर्मतः पालयामास प्रजाः पुत्रानिवौरसान्। ८। न तस्य राज्ये दुर्भिक्षं नाधयो व्याधयस्तथा। निरातंकाः प्रजास्तस्य धनधान्यसमेधिताः। ९। नान्यायोपार्जितं वित्तं देशे तस्य महीतले। स्वे स्वे मार्गे प्रवर्त्तंते सर्ववर्णा

श्रमास्तथा ॥१०॥ कामधेनुसमा भूमिर्यस्य राज्ये महीतले । तस्यैवं कुर्वतो राज्यं बहुवर्षगणा गताः ॥११॥ अथ कदाचित्
संग्रामे विपिके वलकर्मणः ॥ वर्षत्रयं न चिक्षेप न ववर्ष बलाहकः ॥१२॥ ततो हि याः प्रजास्तस्य बभूवुः क्षुधयार्दिताः
स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः ॥१३॥ बभूव विषयस्तस्याभावेन परिपीडितः ॥ अथ प्रजास्समागत्य राजा-
नमिदमब्रुवन् ॥१४॥ प्रजा ऊचुः ॥ श्रूयतां राजशार्दूल प्रजानां वचनं त्वया ॥ आपो नारा इति प्रोक्ता पुराणे मुनि-
भिः ॥१५॥ अयनं ता भगवतः तस्मान्नारायणः स्मृतः ॥ पर्जन्यरूपी भगवान् विष्णुः सर्वगतः स्थितः ॥१६॥ स एव कुरुते
वृष्टिं वृष्टेरन्नं ततः प्रजा ॥ तदभावेन नृपते क्षयं गच्छन्ति ते प्रजाः ॥१७॥ तथा कुरु नृपश्रेष्ठ योगक्षेमं यथा भवेत् ॥
राजोवाच ॥ सत्यमुक्तं भवद्भिश्च न मिथ्याभिहितं वचः ॥१८॥ अन्नं ब्रह्मेति प्रोक्तं अन्ने सर्वं प्रतिष्ठितं अन्नाद्भ-
वन्ति भूतानि जगदन्नेन वर्तते ॥१९॥ इत्येवं श्रूयते लोके पुराणे बहुविस्तरं ॥ नृपाणामपचारेण प्रजानां पीडनं भ-
वेत् ॥२०॥ नाहं पश्यामि स्वकृतं दोषं बुद्ध्या विचारयन् ॥ तथापि यतिष्यामि प्रजानां हितकाम्यया ॥२१॥ इति कृत्वा
मतिं राजा परिमेयपरिच्छदः ॥ नमस्कृत्य विधातारं जगाम गहनं वनं ॥२२॥ चचार मुनिमुख्यानामाश्रमांस्तपसै-
धितान् ॥ ददर्शाथ ब्रह्मसुतमृषिमंगिरसं संस्मृतं ॥२३॥ तेजसा द्योतितदिशं द्वितीयमिव पद्मजं ॥ तं दृष्ट्वा ह-
र्षितो राजा अवतीर्य स्ववाहनात् ॥२४॥ ननमश्चक्रेस्य चरणौ कृतांजलिपुटो वशी ॥ मुनिस्तमभिनंद्याथ स्व-

स्तिवाचनपूर्वकं ॥२५॥ पप्रच्छ कुशलं राज्ये समस्तं गेहमागतः । निवेदयित्वा कुशलं पप्रच्छ नामयं नृपः ॥२६॥ दत्ता
सनो ऋषिर्दीप्तार्थः उपविष्टस्य संनिधौ । चतुर्वा च मुनिं राजा पृष्टो योगमकारणं ॥२७॥ राजोवाच ॥ भगवन्धर्मविधिना
मम पालयतो महीं । अनावृष्टिसमुद्भूता नाहं वेद्मि च कारणं ॥२८॥ संशयच्छेदनायात्र आगतोहं तवांतिके । योगक्षे
मविधानेन प्रजानां कुरु निर्वृतिं ॥२९॥ ऋषिरुवाच । एतत्कृतयुगं राजन्युगानामुत्तमं स्मृतं ॥ अत्र ब्रह्मोत्तरा
लोका धर्मश्चात्र चतुःपदः ॥३०॥ अस्मिन्युगे तपोयुक्ता ब्राह्मणा नेतरे जनाः । विषये तव राजेंद्र वृषलोयं तप
स्यति ॥३१॥ अकार्यकरणात्तस्य न वर्षति बलाहकः । कुरु तस्य वधे यत्नं येन दोषः प्रशाम्यति ॥३२॥ राजोवाच ॥
नाहमेवं वधिष्यामि तपस्यंतमनागसं ॥ धर्मोपदेशं कथय उपसर्गविनाशनं ॥३३॥ ऋषिरुवाच ॥ यद्येवं तर्हि
नृपते कुरुष्वैकादशीव्रतं ॥ नभस्यस्य सिते पक्षे पद्मा नामेति विश्रुता ॥३४॥ एकादशी भाद्रपदे शुक्ले च हरिवल्ल
भा ॥ स्नापयेच्च हृषीकेशं अपराजितया सह ॥ पूजयेत्कालपुष्पैश्च कुंकुमाद्यैर्नाघर्मितमं ॥ घृतखांडं च नैवेद्यं
दीनं ब्रह्मपुरीचतं ॥३६॥ तस्या व्रतप्रभावेन सुवृष्टिर्भविता ध्रुवं । सर्वसिद्धिप्रदा ह्येषा सर्वोपद्रवना
शनी ॥३७॥ अस्याव्रतं कुरु नृप सप्रजः सपरिच्छदः । इति वाक्यमृषेः श्रुत्वा राजा स्वगृहमागतः ॥३८॥
प्राप्ते भाद्रपदे मासि पद्माव्रतमथाकरोत् । प्रजाभिः सह सर्वाभिः चातुर्वर्णसमन्वितः ॥३९॥ एवं कृते तु युगेरा

मत्प्रवर्षविच्छारकः ॥ जलेनप्लाविता पृथ्वी रत्नवस्त्रस्य मालिनी ॥ ५० ॥ ऋषिकेशप्रसादेन जोकासोख्यं प्र
पेदिरे। एतस्मात्कारणाद्देव कर्त्तव्यं व्रतमुत्तमं ॥ ५१ ॥ भुक्तिमुक्तिप्रदं चैव लोकानां सुखदायकं। पठनाच्छ्रवणा
दस्यास्सर्वपापैः प्रमुच्यते ॥ ५२ ॥ ॥ इति श्री ब्रह्मांडपुराणे श्रीकृष्णयुधिष्ठिरसंवादे भाद्रपदशुक्लामहात्म्य
नामः ॥ ॥ १९ ॥ ॥ छ ॥ ॥ अथ श्रवणद्वादशीकथा लिख्यते ॥ ॥ ऋषिरुवाच ॥ ॥ कमरूपधरं देवं धरणि
धरमुसंस्थितं। महर्षयो ब्रह्मविदो पप्रच्छुरंजलीपुटा ॥ १ ॥ कथिता नित्वया देवव्रतानि बहू विस्तरात्। सांप्रतं श्रो
तुमिच्छामि व्रतानामुत्तमं व्रतं ॥ २ ॥ ---- विजयाख्यं समीहितफलप्रदं ॥ कृच्छ्रपापनिर्हरं जन्ममृत्युनि
कृंतनं ॥ ३ ॥ कृतेनयेन भगवन्सर्वकामफलं लभेत् ॥ तदस्माकं कुरुणया कथयस्व परं हितं ॥ ४ ॥ श्रीभगवानु
वाच ॥ शृणुध्वं सर्व एवैते सावधाना द्विजोत्तमा। तस्मादत्तं कृतं जन्मसंवलित्सगुणां भवेत् ॥ ५ ॥ अस्याभत्रा वंव
शामि शृणुध्वं द्विजपुंगवाः ॥ महोदयं नाम श्रमंनगरं देवनिर्मितं ॥ तत्र द्विजातिप्रवरो गमस्ति ब्राह्मणे वस
न्। देवद्विजरतो नित्यं हरिभक्तः सदाव्रती। ७। अथाध्ययनशीलश्च अग्निहोत्रक्रियाचकं। तस्याधिवसतो गेहे
लागता द्वादशी तिथि ॥ श्रावणेन समायुक्ता मासि श्रोष्टपदे सिता ॥ नियमस्थो भवत्तस्या मुपवासक्रियापरः ॥ ८
अद्यस्थित्वा निराहारः सर्वभोगविवर्जितः। त्वत्प्रसादादविघ्नेन श्वभ्रोहे हं जनार्दन ॥ १० ॥ एवमनियमं कृत्वा

ब्राह्मणः शंसितः व्रतः। भार्यपुत्रवधुशिष्यैः सहितो व्रतमाचरत्।११। तस्मिनेवदिने पुण्ये वणिक्पुत्रः समागतः। क्षुधा
र्त्तो द्विजश्रेष्ठ क्षुत्पिपासासमन्वितः।१२। प्रक्षाल्य पादौ चाचम्य संस्थितश्चासने वरे। यावत्पश्यत्यसौ तत्र न काचित्या
कसंस्थितः।१३। किमेतदिति मन्वानः पप्रच्छ द्विजसत्तमं। भगवन्ब्रूहि तत्त्वेन किमेतद्वर्त्तते धुना।१४। गर्गस्तमुवाच।
अद्य पुण्यदिनं भद्र विजयाख्यं बभूव ह। सर्वमेतन्महद्दिव्यं व्रतं कार्यं समुद्यतं।१५। कुटुंबं वर्त्तते तत्र निराहारं
परिस्थितः। त्वमप्यद्य कुरु विप्रो व्रतमेतत्सुशोभनं।१६। सर्वपापहरं पुण्यं विष्णोस्तुष्टिकरं परं। श्रुत्वेमं प्रतिबो
ध्याथ गत्नस्तिस्तं वणिक्सुतं॥ स गर्गः प्रतिसंज्ञाय तेनैव सहितो द्विजः। कुटुंबं तं वणिक्पुत्रं महाग्रामनिवा
सिनं। अथ मिष्टं जडं भूर्यं देवब्राह्मणनिंदकं। सोपि स्नातो वणिक्पुत्रो भ्रांतो विमनमानसः।१७। स्नात्वा देवगृहे
रम्ये वेलवेला गतो द्विजः। संभारान्कारयामास व्रतार्थं सुमनोहरान्। ताम्रपात्रं व्रीहियुतं अर्घ्यं कोष्टकरणं
नवं। तथा कृष्णतिलान्विप्रा वस्त्रयुग्मं मनोहरं।२१ हाटकं वामनरूपं समग्रं सपरिच्छदं। ब्राह्मण उवाच॥
भगवन्विस्तरेणेदं मस्माकं कथयाधुना। तिलाः कति प्रमाणास्तु किं पात्रं परिमाणकं। कथं सर्वा मनः कार्या सर्व
मेतद्ब्रवीहि नः। कूर्म उवाच॥ तिलाः पलशतं ताम्राया पात्रं विंशतिसंख्यया॥ पलानां कारयेद्विप्र वामनं पंचसंख्य
या॥२४॥ सुवर्णस्य तदर्द्धेन यथा वित्तानुविस्तरं। कार्यं सर्वं द्विजश्रेष्ठ नात्र कार्या विचारणा।२५। तत्र संस्थ

एककलशं पात्रं चोपरि संस्थितं। सहिरण्यं च कलशं सन्निधानेन संयुतं।२५। पात्रे कृत्वा ततो देवं वामनं स्थापयेत्सुधी
र्गत्युपरि स्थाप्य तिला तत्रैव संस्थितो। वरो वरेण्यो वरदो वाराहो धरणीधरः। अपवित्रः पवित्रो वा करोतु भगवा
न् हरिः।२८। स्नानमंत्रः॥ नमस्ते कमलनाभाय नमस्ते जलशायिने। नमस्ते केशवानंत वासुदेव नमोस्तु ते।२९
कलशस्थापनमंत्रः॥ कदलीगर्भसंभूतं तिलरूपांगसंभवः। कुरु देवं प्रतिष्ठाप्य वामनाय नमोस्तु ते।३०॥ ॥
वामनप्रतिष्ठामंत्रः॥ पादांगुलीकिवो पास्ते हस्तांगुलिश्च उपसका। चंद्रादित्यौ च नयने लौ शिरः सृजितो मया।
पुष्पधूपदीपादिना दत्तमंत्रः॥ स श्रीकः श्रीधरगुरु श्रवणद्वयुतो मम। अर्घ्यं गृहाण भगो गोविंद श्रीदद्वया
महितो मे तु। अर्घमंत्रः। वामनो बुद्धिदाता च द्रव्यस्थो वामनः स्वयं॥ वामनः स्तारको नित्यं तेन विवामनेन नमः
३१॥ दानमंत्रः॥ विधानेन समभ्यर्च्य दत्वार्घं नियतः शुचिः। रात्रौ जागरणं कृत्वा सर्वपापैः प्रमुच्यते॥३२॥ ॥
एवं कृत्वा द्विजश्रेष्ठे दत्तोणं संविसृज्य सर्वदा। प्रभाते तेन सहितो गृहमागात्समन्वितः सकः।३३। दत्वा परिच्छदं सर्वं
विप्राय वामकरं बिने। दक्षिणायुतं तत्र रद्याम करकं वनं।३४। सोपि दाता पितः सर्वं दक्षिणासमन्वितं
कनकेन नमंत्रेण मैत्रीयुक्तेन कामतः।३५। पश्चाच्च पारणं कृत्वा वणिक्सबुभुजे ततः॥ विश्रम्य च सुहृ

५८ असिद देवं देवेशा नमस्ते विश्वभावन। नमस्ते दितिपुत्राय पीतनिर्मलवाससे॥३६॥ चैदनंमंत्रः॥ ५८

५०

हो॰मि

तदुगतं स्वस्थानमुत्सुकः ॥३९॥ ततः कतिपयासो द्विवणि कूपं च खमागतः । तं न्यग्रोधं पुरा तेन बालत्वा वेष्टु शोभ-
नं ॥४०॥ आरोपितं प्रयत्नेन संचितं पालितं द्विजाः । दृष्टः स बकुभिः स्तत्र पिशाचैः कर्मकारकैः ॥४१॥ उत्पतेदेव-
तस्थानं यत्र यत्रास्य रोचते । तेषाम मध्ये समन्नवत् सराजा । गुह्यकेश्वरः । तत्र मध्यगतो नाति देवकन्यासु शोभना
॥ आनयत्कनकं छत्रं जलपूर्णं घटं द्विजाः ॥४२॥ दधिभक्तं शरावेण पिहितं तु मनोहरं । भुजते तेन सहिता ॥
पिशाचास्तत्र गुह्यकाः ॥४३॥ पश्चात्स बुभुजे राजा तदन्नम मृतोपमं । तीर्थयात्राप्रसंगेन स द्विजो मरुमंडले ॥४४॥
भ्रांतो बुभुक्षितो ग्राम्यो न्यग्रोधो शाखिनं नरं । यावत्पश्यति तत्र जंतुस्तत्र विरूपकाः ॥४५॥ एकांतान्नाद्रपि गगनयानात्
दीर्घतुंडभयानका न्यगाद्दृष्ट्वा भयमापन्नो गमनस्थो मुनिसत्तमः ॥४६॥ विलीनो मध्यगे गुल्मे न्यग्रोधस्य ससंभ्रमः ।
अथ परपतिचायां तं करकं दधिसंयुतं । देवजो कच्छर स्त्रीभिः सदृष्टं तं सुमनोहरं । आनीय च ततो गुह्यास्तेन्यस्तास
समापतः ॥४८॥ विभज्य प्रददौ तेषां गुह्यकानां गणैस्तदा । पश्चाच्च श्रद्धभुक्तो रासनातिथ्यविंतमं ॥५०॥ तस्मिंस्तु स-
मये विप्रो गुल्मान्निःसृत्य धैर्यतः । अद्याहमतिथिः प्राप्तेश्चिरकालं बुभुक्षितः । ------ सुस्वादु तदन्नममृत
तुल्यं भुजापितो द्विजवरो महत्या श्रद्धया किल ॥५२॥ पश्चात्सीतं सुगंधं च तथानीयं करे केस्थितं । विश्रांतो निर्ग-
यो जातो स्वष्टहे वर्तते यथा । तु तुल शेषं ततो गुह्यकैस्तेनैव द्विजसत्तमा । रुते तु के तदा सन्ने स्वस्थाने चागमत्तु नः ॥

देवकन्याप्यतेपार्श्वे स्वर्गलोके दुरासदं। सोपितेनैवसहितः कथां चक्रे द्विजोत्तमाः।५५। कस्मात्तस्या नादिहाग
तः किमागमनकारणं। कथयस्व द्विजश्रेष्ठ परं कौतूहलं हि मे।५६। ब्राह्मण उ०। तीर्थयात्राप्रसंगेन त्वागतोम
रुमध्यतः। सार्थेन भ्रष्टो नसदेहो यया तस्तवचाश्रमं।५७। ग्रामस्तीरिति विख्यातं नाम ते कथितं मया। नामसंकी
र्तनात्तत्र युत्पको जातिस्मरन्नृ।५८। उवाच तं द्विजवरं स्वर्वमित्रीसमे द्विजः। स्वर्वसमुद्रगोहं वै उपदेशत्वया
नघ।५९। श्रवणद्वादशीयोगात्कृतस्यास्य प्रभावतः। इदानीं तु गमिष्यामि प्रयागे तीर्थमुत्तमं।६०। समे गेयुत्पके
न्ते त्वेस्त्त्वसाधुसमागमः। यथा समुद्धरस्तस्मात्तथया कुरु न संशयः।६१। एतस्मिन्नन्तरे विप्रास वैतेयुत्पका
किच्छः। विप्रेण सहिता प्राप्ता प्रयागं पापनाशनं। श्राद्धं कृतं तदा तेन सर्वेषां नामगोत्रतः॥ प्राप्तो देवसानिध्यं
ते च सर्वे दिवं गताः।६२। द्वादश्यामुपवासेन त्रयोदश्यां तु पारणं। निषिद्धमपि कर्त्तव्यमाज्ञैषा परमेष्ठि
नः। श्रवद्वीपदानमाहात्म्यं यः शृणोति नरः सुधीः। कृत्वा प्रकुर्वतेन्नूनं सर्वकामफलं लभेत्। विजयाख्यं म
ताद्वादशीं नियतः समुपाश्रयेत्। आदाय पुरुषान्सप्त पितृपक्षे मातृकां तथा। आत्मना सहितो दिव्यैर्विमानैः सर्व
कामिकैः। किंकिणीरवनिर्घोषैर्विष्णुलोकं नयेन्नरः। ततो देववरं कृत्वा द्वादश द्वादशीफलं। तयोस्तु सगमे कु
त्वा द्वादशद्वादशीहरेत्॥ आनाके च सितेपक्षे मे त्वश्रवणे रवति संगमे नैव ज्ञो लब्ध्वं द्वादश द्वादशीफलं॥
६३

॥ ॥इति श्रीभविष्योत्तरपुराणे भाद्रपदस्य कृष्णश्रवणद्वादशीव्रतं नाम॥ ॥युधिष्ठिर उ॰॥ कथयस्व प्रसा
देन मम माधव मधुसूदनः। नभस्य कृष्णपक्षे तु किं नाम का दशी भवेत्॥१ श्रीकृष्ण उ॰॥ नभस्य कृष्णपक्षे तु इंदि
रा नाम नामतः। तस्या व्रत प्रभावेन नश्यते पापं च नरपतिः। २। अधोयोनिगतानां च पितॄणां गतिदायिनी शृणुष्वाव
हितो राजन् कथां पापहरां परां। ३। यस्याः श्रवणमात्रेण वाजपेयफलं लभेत्। पुरा कृतयुगे राजा बभूव रिपुमर्द्द
नः॥ इंद्रसेन इति ख्यातः पुरीमाहिष्मतीं प्रति। सराज्यं पालयामास धर्मेण यशसान्वितः। ५। कालं नयति धर्मेण अध्या
त्मध्यानचिंतकः। एकस्मिन् दिवसे राज्ञि सुखं संस्थिते सदो गते। ६। अवतीर्यागमद्धीमान् अंबरान्नारदो मुनिः। तमा
गतं भक्तिभेदं त्रस्तुः प्रत्युत्थाय कृतांजलिः। ७। पूजयित्वाथ विधिना आसने सन्निवेश्य यत्। सुखोपविष्टं स मुनि
प्रत्युवाच नृपोत्तमः। ८। कुशलं तव राजेंद्र सप्तस्वंगेषु वर्तते। धर्मे मतिर्वर्तते च विष्णुभक्तिरतः सदा। ९। राजा
उवाच॥ त्वत्प्रसादान्मुनिःश्रेष्ठ सर्वत्र कुशलं मम। अद्य क्रतुक्रियाः सर्वाः सफलास्तव दर्शनात्। १०। प्रसा
दं कुरु विप्रर्षे ब्रह्मागमनकारणं। नारद उ॥ श्रूयतां नृपशार्दूल मम ध्यावाविस्मयप्रदं। ११। ब्रह्मलोकादहं
प्राय यमलोकं नृपोत्तमः। यमेनार्चितो भक्त्या उपविष्टो वरासने। १२। धर्मशीलास्सत्यवंतो भास्करासमुपासते॥
बहुपुण्यप्रकर्तारो व्रतवैकल्यदोषतः। १३। सभायां च मया दृष्टः पिता तव। कथितस्तेन संदेशो

तं निबोध युधिष्ठिर ।१४। इंद्रसेन इति ख्यातो राजा माहिष्मतीपतिः । तस्याग्रे कथयन्ब्रह्मन्कथं मां यमसन्निधौ ।१५
केनापि चांतरायेण स्वर्गं जन्मोद्भवेन च । स्वर्गं प्रेषय मां पुत्र इंदिरापुण्यदानतः ।१६। इत्युक्तोऽयं समायातः स
मीपं तव पार्थिव । पितुः स्वर्गे नयेराजन् इंदिराव्रतमाचर ।१७। राजोवाच ॥ कथयस्व प्रसादेन भगवानिंदि
राव्रतं । विधिना केन कर्तव्यं कस्मिन्पक्षेऽथ तिथौ तथा ।१८। नारद उ० ॥ शृणु नारद ते वच्मि व्रतस्यास्य विधिं शुभं
नभस्यस्यासिते पक्षे दशमी दिवसे शुभे ।१९। प्रातः स्नानं प्रकुर्वीत श्रद्धायुक्तेन चेतसा । ततो मध्याह्नसमये ।
स्नानं कृत्वा नदीजले ।२०। पितॄणां कारयेच्छ्राद्धं प्रकुर्यात् श्रद्धयान्वितः । एकभक्तं ततः कृत्वा रात्रौ भौ शयीत वः । रात्री
प्रभाते विमले जाते प्राप्ते चैकादशीदिने । मुखप्रक्षालनं कुर्यात् कुर्याद् दंतधावनं । उपवासस्य नियमं कृत्वा ।
याद्भक्तिभावतः । अद्य स्थित्वा निराहारः सर्वभोगविवर्जितः ।२२। श्वो भोक्ष्ये पुंडरीकाक्ष शरणं मे भवाच्युतः । इत्ये
वं नियमं कृत्वा मध्याह्नसमये तथा ।२३। शालिग्रामशिलाग्रे तु श्राद्धं कुर्याद् यथाविधि । भोजयित्वा द्विजवरान् ४२
दक्षिणाभिश्च पूजितान् ।२४। शेषं चैकादशी कृत्वा संजयेद्वा जनार्दनं । देवं तु भगया सार्धं उपस्करवरांश्चैतान् ।२६
शिवफलं ददेद् धूपं नैवेद्यं पंडमंडकां । विधिवद् दीयते कन्यां स्वजातीयवराननं ।२७। पूजयित्वा हृषीकेशं धूपगंधा
दिभिस्तथा । रात्रौ जागरणं कुर्यात् केशवस्य समीपतः ।२८। ततः प्रभातसमये संप्राप्ते द्वादशीदिने । अर्चयि

त्वा हरिं भक्त्या भोजयित्वा द्विजान् घ ।२९। बंधुदौहित्रपुत्राद्यैः स्वयं भुंजीत वाग्यतः । अनेन विधिना राजा यः करोत्य
तमं तन्द्रितः ।३०॥ विष्णुलोकं प्रयास्यंति पितरस्तस्य भूपते । इत्युक्त्वा नृपतिं राजन् मुनिरंतरधीयत ।३१। यथोक्त
विधिना राजा चकार व्रतमुत्तमं । अंतःपुरेण सहितः पुत्रभृत्यसमन्वितः ।३२। कृते व्रते तु कौंतेय पुष्पवृष्टिरभू
द्दिवि । तत्पिता गरुडारूढो जगाम हरिमंदिरं ।३३ कृते व्रते तु कौंतेय पुष्पवृष्टिरभूद्दिवि । ॥इंद्रसेनोपि राजर्षिर्भु
क्त्वा राज्यमकंटकं ॥ राज्ये निवेश्य तनयं जगाम त्रिदिवं गतः ।३४ इंदिराव्रतमाहात्म्यं तवाग्रे कथितं मया । पठनात्
श्रवणाद्राजन् सर्वपापैः प्रमुच्यते ।३५॥ ॥इति श्रीब्रह्मवैवर्त्तपुराणे श्रीकृष्णयुधिष्ठिरसंवादे भाद्रपदे कृष्णा इं
दिरा माहात्म्यं नामः ॥ ॥२०॥ ॥छ॥ युधिष्ठिर उवाच ॥ कथयस्व प्रसादेन भगवन् मधुसूदनः । इषस्य शुक्लपक्षे
तु किंनामैकादशी भवेत् ॥१॥ श्रीकृष्ण उवाच ॥ शृणु राजन् प्रवक्ष्यामि माहात्म्यं पापनाशनं । एकादश्यामुपवासस्य म
हिमानं निबोध मे ।२। एकादशीसमं किंचित् पुण्यं लोके न विद्यते । व्याजेनापि कृता राजन् न दर्शयति भास्करं ॥३॥
स्वर्गमोक्षप्रदा ह्येषा धनपुत्रप्रदायिनी । रात्रौ जागरणं कुर्यात् समुपोष्य हरेर्दिनं ।४। अत्र गयासेन भूपाल प्राप्य
ते वैष्णवं पदं । दशैव मातृके पक्षे दश राजेंद्र पैतृके ।५। प्रियायाः दश पक्षे तु पुरुषानुद्धरेन्नरः । चतुर्भुजो दिव्यरूपा
नागारिकृतकेतनः ।६। स्रग्विणः पीतवस्त्राश्च प्रयाति हरिमंदिरं । बालत्वे यौवनत्वे च वृद्धत्वेपि नृपोत्तमः ।७। उपो

प्रथादशी तु नं नेति पापो पातिदुर्गतिं। पापांकुशा तु पोषेव आश्विनस्य सिते तरे।।१७।। सर्वपापविनिर्मुक्तो हरिलोकं स ग
च्छति। दत्वा हेमतिलान् भूमिं गामन्नमुदकं तथा।।१८।। उपानछत्रवस्त्रादि न पश्यति यमं नरः। यस्य पुण्यविहिता
निदिनान्यायांति यांति च।।१९।। स लोहकारभस्त्रेव स्वसन्नपि न जीवितं। अवध्यं दिवसं कुर्याद्दरिद्रोपि नृपोत्तमः।।२०।।
श्रीकृष्ण उ०।। एवं विधा मया प्रोक्ता पक्षयोरुभयोरपि। एकादश्यां प्रकर्तव्यो वासरो मम पांडव।।२१।। तेषां तु वैष्णवं।
स्थानं यत्रास्ते गरुडध्वजः।। धन्यास्ते मानवा लोके विष्णुभक्तिपरायणाः।।२२।। एकादश्यास्तु माहात्म्यं प्रातः प्रातः पठेच्च यः।।
गोसहस्त्रप्रदानेन तत्फलमवाप्नुयात्।। एकादश्यास्तु माहात्म्य। दिवा वा यदि वा रात्रौ पश्येत शृणुयान्नरः। कुलानि
दशसंयुक्तो विष्णुलोके युगक्षयेत्।।२५।। एकादश्यां च विष्णोश्च नाममात्रमपि संस्मरन्। प्रक्षालयति पापानि सुबहूनि
कृतान्यपि।।२६।। विष्णुरेकादशी गीता तुलसी विप्रधेनवः। असारे दुःखसंसारे षट्पदी मुक्तिदायिनी।।२७।। दैत्यवंशप्र
सुतास्ते दशमीविधमाश्रिता।। विस्मृतैरपि न त्राता भद्रीनंदशीयुतं।।२८।। हठादेव विमर्कुर्वंतिये नराज्मतमोहिता। उ
दर्शी तु दशीदद्यात्। संश्रिता मम वासरे।।२९।। यान्याहि चाश्रिता पार्थ इंद्रलोभमवासरं। सर्वसिद्धिप्रदान् पूर्णान्मनंतका
नां न संशयः।।२०।। जयंतापि स्नुवंतापि दइंथस्त्री वसेव का। ये कुर्युः दशमाविधा नमस्सुप्रियाप्कवित।।२१।। भ्रष्टपुनःसं
श्रयपार्थ ते यस्ते मम वैरिण। कुर्वंति मद्दिनं विधास्तु क्रवाक्यविमोहिता।।२२।। दैत्यवंशसमुद्भूता बालकावा वयानि

४३

निम्नतले। अर्कसंस्थापयामास सर्वंपि मतमेव च। २३। तस्मिंश्चायत्नतो पार्थ मृत्पकाशानि दायिनी दशमी विधानकर्तव्या।
प्राणैकं वक्ष्यते रपि। २४। जन्मकोटि विमुक्तानां मम भक्तानां धनंजय। अज्ञानेन निर्मितामाया बहूनां तथमेवानुयाता। २५। तेक
लेकुर्वन्मामन्तःस्थं विघ्नंति कश्चिदह। मद्दिने ये च रिष्यंति दशमी वेधवर्जितां। २६। समाचरन्नयथा शक्त्या स्नानं दानादिका
क्रियां। एकादशी विशोकाच। असितेपापितासिना। २७। स्थापयेत्पम्पनानं च पञ्चामृतसम्पूर्णितं। स्वयंवृक्ष शमी पुष्पैरर्ध्यं
दमनजं फलं। २८। शालिपिष्टेन नैवेद्यं शर्करासहितं नवं। दीयते मोदकान्पूपखंडेन सर्पिषान्वितं। २९। तडागसमसो
धानां सत्रादि पुण्यकर्मणां कर्तारो नैव पश्यंति घोरां तं यमयातनां। ३०। दीर्घायुषो धनाढ्याश्च कुलीना रोगवर्जिताः॥
दृश्यंते मानवा लोके पुण्यकर्तारि दृशा। ३१। किमत्र बहुनोक्तेन यात्पधर्मेण दुर्गति। आरोहति दिवं धर्मे नात्र कार्या
विचारणा॥ इतिते कथितं राजन्पृष्टोहं यत्त्वयाधुना। पापांकुशाया माहात्म्यं किमन्यत्श्रोतुमर्हसि। ३३॥
इति पद्मपुराणे श्रीकृष्णयुधिष्ठिरसंवादे आश्विनशुक्ला पापांकुशा माहात्म्यं नाम समाप्तं॥ ॥२१॥ ॥छ॥ ॥छ॥॥
युधिष्ठिर उ०॥ कथयस्व प्रसादेन मम मर्त्ये हा जनार्दनः। आश्विनस्यासितेपक्षे किंनामेकादशी भवेत्॥ १॥ श्रीकृष्ण
उवाच॥ शृणुष्व राजशार्दूल कथयामि तवाग्रतः॥ आश्विने कृष्णपक्षे तु रामा नाम सुशोभना॥ ए एकादशी समा
ख्याता महापापहरापरा॥ अस्या प्रसंगतो राजन्माहात्म्यं प्रवदामि ते॥ ३॥ मुचुकुंदेति विख्यातो बभूव नृपतिः पुरा॥

२४

देवेंद्रेण समं यस्य मित्रत्वं समपद्यत ।४। यमेन वरुणेनैव कुबेरेण समं तथा। विभीषणेन यस्यैव सखित्वमभ
वन्नृप ।५। विद्रुमेक्षः स सर्वस्व धीबभूव नृपतिः सदा। तस्यैवं शासितो राज्ये राज्यं निहतकंटकं ।६। बभूव मे
विहगतेन चंद्रभागा सरिद्वरा। शोभनेनाव वत्सा दत्ता चंद्रसेनसुताय वै ।। कदाचित् समये प्राप्त स्वशुरस्य गृ
हे नृप। एकादशीव्रतमिदं समयातं सुपुण्यदं ।७। समागते व्रत दिने चंद्रभागा व्यचिंतयत्। किं नु विधा
दैवैवा मम भर्त्तातिदुर्बलः ।८। क्षुधां न सहते सोऽदं पिताचैवोग्रशासनः। पटहस्ताडितेयस्य सम्प्राप्ते दशमी
दिने ।१०। न भोक्तव्यं न भोक्तव्यं न भोक्तव्यं हरेर्दिने। चंद्रभागा उ०।। मत्पितुर्वेश्मनि विभो भोक्तव्यं नाद्य केन
चित् ।११। गजैरश्वैश्च करिभिः रन्यैपशुभिरेव च। तृणमन्नं तथा वारि न भोक्तव्यं हरेर्दिने ।१२। मां न वेश्म कु
तः कांतः ततो गेहं प्रयास्यसि। एवं विचार्य मनसा सुदृढं मानसं कुरु ।१३। शोभनोवाच। सत्यमेतत्प्रियेवा
क्यं करिष्येऽहमुपोषणं ।१४। दैवेन विहितं यच्चितत्तथैव भविष्यति। इति दृढमतिं कृत्वा चकार नियमं व्रते। क्षुत
ष्णापीडिते तत्र बभूवातिव्याकुलस्तदा। इति चिंतयतस्तस्य आदित्यो स्तमगादिति। वैष्णवानां नराणां सा निशा हर्ष
विवर्द्धनी ।१५। हरिपूजारतानां च जागरासक्तचेतसां। बभूव नृपशार्दूल शोभनस्याति दुःखदा ।१६। रवेरुदय
वेलायां शोभनः पंचतां गतः। दाहयामास राजानं राजयोग्यैश्चदारुभिः ।१७। चंद्रभागा न मदेहं दाह

४४

६

पतिं नासदत्॥ कृतौ द्वौ हि किं तस्य तस्यैव जनकवेश्मनि॥१९॥ शोभनेन नृपश्रेष्ठ रमाव्रतप्रभावतः॥ प्राप्ते देवसरोवर
मेघमंदराचलजादपि॥२०॥ अनुपममनाधृष्यामसंस्थो ययगुणान्विता॥ अतस्तत्र मयैः सौधैरुद्यानैर्नंदनोपमैः॥२१
स्फाटिकैर्विविधाकारैर्विचित्रैरुपशोभितं॥ सिंहासनसमारूढो सुखेत छत्रचामरः॥ केयूरकुंडलयुतौ हार
कंकणभूषणैः॥ सुयमा नेच्छमधर्वैरप्सरोगणसेवितः॥ शोभनः शोभते॥ तत्र देवराजपुरो यथा॥ सोमशर्मे
ति विख्यातो मुचुकुंदपुरे वसन्॥ तीर्थयात्राप्रसंगेन भ्रमन् विषदर्शितं॥ नृपनामंतरं ज्ञात्वा ततः समीपं
जगाम तः॥२५॥ शोभनोपि ततो ज्ञात्वा तत्समीपजगाम सः॥२५॥ शोभनोपि ततो ज्ञात्वा सोमशर्माणमागतः॥ आ
आसनादुत्थितं शीघ्रं नमश्चक्रे द्विजोत्तमं॥२६॥ चकार कुशलं प्रश्नं श्वसुरस्य नृपस्य च॥ कांताया चंद्रभागाया॥
नगरस्य तथैव च॥२७॥ सोमशर्मोवाच॥ कुशलं वर्त्तते राजन् श्वसुरस्य तव गृहे॥ चंद्रभागा कुशलिनी सर्वतः कु
शलं पुरे॥२८॥ सुवृत्तं कथ्यतां राजन् नाश्चर्यपरमं मम॥ पुरं विचित्रं रुचिरं न दृष्टं केन चित् क्वचित्॥२९॥
एतदाचक्ष्व नृपते कुतः प्राप्तमिदं त्वया॥ शोभन उवाच॥ अस्मिन्स्यासिते पक्षे या नाम्नैकादशी रमा॥ एकादशी च वि
ख्याता हसिते सुखलभ्या॥ कृतं स सज्जये देवं देव्या जांबुवतीसह॥३१॥ मुचुकुंदेश्वरनैः पुष्पैरर्घैर्नानाफलै
र्वरैः॥ नैवेद्यैर्गुडसर्पिर्भ्यां घृतकुंभेन दापयेत्॥३२॥ तामुपोष्य मया प्राप्तं चिन्नेदं मम ध्रुवं भवति यनेतर॥

२

ध्रुवं

गुरुश्च ऋषिर्द्विजोत्तमः ।३३। द्विज उ० ॥ कथमध्रुव नेत्रायि कथं हि भवति ध्रुवं । तत्वं कथय राजेंद्र तत्करिष्यामि नान्य
था ।३४। राजोवाच ॥ मयि चित्त द्विहितं विप्र श्रद्धा हि नं व्रतोत्तमं । येनाहं अध्रुवं मन्ये ध्रुवं भवति तन्नु कुरु ॥३५॥
मुचकुंदस्य उहिता चंद्रभागा सुशोभना । तस्यै कथय वृत्तांतं ध्रुवमेतन्न भविष्यति ।३६। इति तस्य वचः श्रुत्वा
गतो विप्रस्य वेश्मनि । कथयामास वृत्तांतं राजकन्यां प्रति द्विजः ।३७। श्रुत्वा यस्मा द्विजवचः विस्मयोत्फुल
लोचनः । पतत्त्वमथ वा स्वप्नस्त्वयैव कथ्यते द्विजः । द्विजोवाच । पतत्सत्य दयितः कांतः स्तत्व दृष्टो मया स्व
मे । इंद्र तुल्यमया दृष्टं पुरं तस्य सुशोभनं । अध्रुवं तेन तत्त्वोक्तं ध्रुवं भवति तत्कुरु ॥ चंद्रभागा उवाच ॥
तत्र मानय विप्रर्षे पति दर्शन लालसा ।४०। आत्मनो व्रतपुण्येन करिष्यामि पुरं ध्रुवं । आवयोर्द्विज संयो
गो यथा भवति तत्कुरु ।४१। प्राप्यते हि महत्पुण्य कृत्वा योगं वियुक्तयोः । इति श्रुत्वा सह तया सो मंदराचलं जगा
म ह ॥ आश्रमं वामदेवस्य मंदराचलसंनिधौ । वामदेवः श्रुत्वा सर्वं वृत्तांतं कथितं तयोः । अभ्यषिंचत चंद्रभा
गां वेदमंत्रैर्यथोर्जितैः । ऋषिमंत्रप्रभावेन विष्णुवासरसेवनात् । दिव्यदेहा बभौ या सो दिव्यां गतिमवापसा ॥
पत्युः समीपमगमत्स्व हर्षोत्फुल्ललोचना ।४५। जहर्ष शोभनो निवेद्य कांतां समागतां ॥ समारुह्य स्वकं वामे
पार्श्वे तां संन्यवेशयेत् ।४६। अथोवाच प्रियं हर्षाच्चंद्रभागा सुभं वचः । श्रृणु कांत हितं वाक्यं यत्पुण्यं विद्यते म
यि ।४७।

५५

अष्टवर्षाधिका जाता याद्दाहं पितृवेश्मनि। मया ततः प्रभृति चरुतमेकादशीव्रतं॥४९॥ यथोक्तविधिना राजन्श्रद्धा
युक्तेन चेतसा। तेन पुण्यप्रभावेन त्वविष्पतिश्रुकवपुरा॥४८॥ सर्वकामसमृद्धार्थे रमेतो दिव्यविग्रहे। रमा व्रतप्रभावे
न मंदराचलसानुना॥५०॥ चिंतामणिसमा तेषां कांमधेनुसमा यथा समा। रमा निधानां रमते तत्वाग्रे कथिता मया॥ श्री
कृष्ण उ०॥ अश्विने कृष्णपक्षेस्तु रमा वै नाम शोभना। तस्या माहात्म्यमुक्तं नघ श्रुतं सर्वं त्वयानघः॥५२॥ मया तवाग्रे क
थितं माहात्म्यं पापनाशनं। एकादशीव्रतं चैव पक्षयोरुभयोरपि॥५३॥ यथा शुक्ला तथा कृष्णा विभेदं नैव कारयेत्
सेवितैकादशी नृणां भुक्तिमुक्तिप्रदायिनी॥५४॥ ॥इति श्री ब्रह्मवैवर्तकपुराणे श्रीकृष्णयुधिष्ठिरसंवादे आश्विन
कृष्णरमामाहात्म्यः॥ ॥२१॥ ॥छ॥ ॥युधिष्ठिर उ०॥ कार्तिके शुक्लपक्षे तु किं नामैकादशी भवेत्। को देवः किं वि
धानं स्यात्कथयस्व जनार्दन।१। श्रीकृष्ण उ०॥ साधुसामहाप्राज्ञलोकानां हितकाम्यया। प्रबोधिन्याश्च माहात्म्यं महा
पातकनाशनं। मुक्तिप्रदं सुबुधीनां शृणुष्व मुनिसत्तमः।२। तावद्गर्जंति विप्रेंद्र गंगा गंगा गिरस्थितो।३। यावन्नाया
ति पापाग्नि कार्तिके हरिबोधिनी। तावद्गर्जंति तीर्थानि आसमुद्रसरांसि च। यावत्प्रबोधिनी विष्णो तिथिनायाति का
र्तिके। नारद उ०॥ एकभक्तेन किं पुण्यं किं पुण्यं नक्तभोजने।५। उपवासेन किं पुण्यं तन्मे ब्रूहि पितामह॥ श्री ब्रह्मो
वाच॥ एकभक्तेन जन्मोत्तं द्विजन्मा नक्तभोजने। उपवासे सप्तजन्मां तं पापं हरति केशवः। यत्सुलभं यत्प्राप्यं त्रै

लोकेसचराचरे। यद्यत्प्रार्थितंपुत्रददातिद्दरिबोधिनी। ७। मेरुमंदरमात्राणि पापान्युग्राणियानिह। एकोनेको पवासेन ददातिपापहारिणि। सर्वजन्मसहस्राणियः कुःकर्मउपार्जितं। जागरेणप्रबोधन्यांदहतेतुलराशिवत् २
यथोक्तंकुरुतेयस्तु विधिनासुकृतंनरः। स्वल्पंमुनिवरश्रेष्टमेरुतुल्यंफलंलभेत्। विधिहिनंतुयः कुर्यात्सुकृतं मेरुमात्रकं। ११। अणुमात्रमवाप्नोतिफलंधर्मस्यनारदः। संध्याहीनेव्रतभ्रष्टेनास्तिकेदेवनिंदके। १२। नैतेषांतिष्ट तेदेहेधर्मशास्त्रविदूषके। परदाररतेमूर्खेकृतघ्नेवंचकेतथा। १३। धर्मोनतिष्टतेदेहएतेषामपिदेहिनां। ब्राह्मणी वापिमर्त्यो वासेवतेपरयोषितं। ब्राह्मणं चविशेषेणचांडालसदृशावुभौ। समन्त्रीवाविमंत्रीवाब्राह्मणोयदिब्राह्मणी। १४। सेवतेमुनिशार्दूलसान्वयोयातिसंक्षयं। परदाराभिगमनंकुरुतेयोद्विजाधमः। १६। सततिर्न भवेतस्यफ लंजन्मार्जितंनहि। गुरुणासहितिष्ठन्यो हंकारेणवर्तते। ७। सुकृतानश्यतेशीघ्रंधनंनान्नोतिसंततं। आचार भ्रष्टदेहानांदुष्टलोगामिनां युतः। १८। यत्तेनस्वेप्समानोपिधर्मस्तेषांपराङ्मुखः। पतितैसह —— गपतितेसंसर्गक र्षां। १९। यःकुर्वीतिमुनिश्रेष्टतेषांवैनिष्फलाक्रिया॥ साधुनामपमानंचयेकुर्वंतिनराधमाः। २०। अत्रैवफलहीनास्ते दग्धतेनरकाग्निना। तस्मान्नताचरेत्कदापि ब्रह्मन्लोकद्वीतं। २२। सदाधर्मरतास्ताबंयथाधर्मोपनश्यति। बोधयंति मनादृत्वाकरिष्यामःप्रबोधिनी। २३। तेषांविलियते पापंसर्वजन्मकृतोद्भवं। समतीतंनविष्यतिवर्तमानकुलागतं।

४६

ग°

विष्णुलोकेचयात्यास्यजागरेणप्रबोधिनी।वसंतिपितरोहृष्टाविष्णुलोकेत्वलंकृताः।२५।कृत्वाउपातकंघोरं
ब्रह्महत्यादिकंनरः।कृत्वाउजागरंविष्णोर्धौतपापोभवेन्मुने।दुःप्राप्यंयत्फलंविप्रअश्वमेधादिभिर्मखैः।
प्राप्यतेतत्सुखेनैवप्रबोधिन्यांतुजागरे।आप्लुत्यसर्वतीर्थेषुदत्वागाःकांचनंमहीं।सत्फलमवाप्नोतिय
कृत्वाजागरंहरेः।२६।जाताःसएवसुकृतीकुलंतेनैवपावितं।कार्तिकेमुनिशार्दूलकृतायेनप्रबोधिनी
यथाक्रवनृणांश्रुतफधननाशस्तथाध्रुवं॥इतिज्ञात्वामुनिश्रेष्ठकर्तव्यंविप्रवंदिनं।३०।यानिकानिच।
तीर्थानित्रैलोक्येसंभवंतिच।तानितस्यगृहेसम्यक्यःकरोतिप्रबोधिनी।३१।विष्णोःप्रियतरोलेषाधर्म
सारस्पदायिनी।सकृदुपोष्यतान्नुपोष्यैवनक्तंभाक्सन्भवेन्नरः।प्रबोधनीमुपोष्यत्वानगर्भेवसतेनरः।सर्वध
र्मान्परित्यज्यतस्मात्कुर्वीतनारद।३४।एकादशीचविख्याताजानंदाचकार्तिके।न्यसेद्दामोदरंदेवंसप्ति
तंराधयासह।पूजयेत्कुंभिकापुष्पैरर्घंपभिनीफलं।गुग्गुलधूपमैवेद्यंसुखशय्याप्रदीयते।कर्मणा
मनसावाचापापयत्समुपार्जितं।तत्क्षालयतिगोविंदप्रबोधिन्यांतुजागरे।समुपोष्यप्रमुच्यतेपापैस्तेशतजे
महाव्रतमिदंपुत्रमहापापौघनाशनं॥प्रबोधवासरंविष्णोर्विधिवत्समुपोषयेत्।व्रतेनानेनदेवेशःपरितोष्यज
नार्दन॥विराजयन्दिशःसर्वायातिभवनंहरेः।कर्तव्येषाप्रयत्नेननरैःकार्तिकराधिपैः॥४०॥द्वादशी

द्विपदां श्रेष्ठ कार्त्तिके प्रबोधिनी। बाल्ये यदर्जितं पापं यौवने वार्द्धके तथा।४१। शतजन्मकृतं पापं स्वल्पं वाथ यदि
वा बहु। सुप्ते माधवं मुनिश्रेष्ठस्तत्कालमपि नारदः।४२। तत्र जागर्यति गोविंदमस्यां मर्त्त्यं भक्तितः। धनधान्यावहा
पुण्या सर्वपापहरा शुभा।४३। चंद्रसूर्योपरागे तु यत्फलं परिकीर्त्तितं। तत्सहस्रगुणं प्रोक्तं प्रबोधिन्यां तु जाग
रात्।४४। जन्मप्रभृति यत्पुण्यं नरेणोपार्जितं भवेत्। वृथा भवति तत्सर्वं अकृत्वा कार्त्तिके व्रतं। अकृत्वा नि
यमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः। उपासनीयो विप्रेन्द्र सर्वकामफलप्रदः। परान्नं वर्जयेद्यस्तु कार्त्तिके विष्णुतत्प
रः। परान्नवर्जनाद्विप्र चांद्रायणफलं लभेत्।४७। नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः। निर्दहेत्सर्वपापा
नि यज्ञायुतफलं लभेत्।४८। न तथा तुष्यते विष्णुर्यज्ञैर्न दानैर्वा गजादिभिः। यथा शास्त्रकथालापैः कार्त्तिके मधुसू
दनः। ये कुर्वन्ति कथां विष्णोर्ये शृण्वन्ति स्वभावतः। श्लोकार्द्धं श्लोकमेकं वा कार्त्तिके गोशतफलं।५०। सर्वधर्मा
न्परित्यज्य कार्त्तिके केशवाग्रतः। शास्त्रावधारणं कार्यं श्रोतव्यं च महामुने।५१। श्रेयसो लोभबुद्ध्या वा यः
करोति हरेः कथां। कार्त्तिके मुनिशार्दूल कुलानां तारयेत् शतं। नियमेन नरो यस्तु शृणुयात्ते च विष्णवा कथां। का
र्त्तिके तु विशेषेण गोसहस्रफलं लभेत्।५२। प्रबोधवासरे विष्णोः कुरुते यो हरेः कथां। सप्तद्वीपावनीदाने यत्फलं जन्म
तं मुने।५३। श्रुत्वा विष्णुकथां विष्णोर्वैयंति कथाविदां। स्वशक्त्या मुनिशार्दूल तेषां लोकास्तथा स्मृता।५५।

४७

गीतशास्त्रविनोदेन कार्त्तिके यर्चयेन्नरः। न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय।५६। बकुलपुष्पैः बकुलफलै
कर्पूरागुरुकुंकुमैः। हरेः पूजा विधातव्या कार्त्तिकां बोधवासरे।५७। वित्तशाठ्यं न कर्त्तव्यं संप्राप्ते हरिवासरे॥
यस्मात्पुण्यमसंख्यातं प्राप्यते मुनिसत्तमाः।५८। फलैर्नानाविधैर्दिव्यैः प्रबोधिन्यां तु जागरे। शंखे तोयं समादाय
अर्घ्यं देयं जनार्द्दने। यत्फलं सर्वतीर्थेषु सर्वदानेषु यत्फलं। तत्फलं कोटिगुणितं दत्वार्घं बोधवासरे।६०॥
गुरोः पूजा ततः कार्या भोजनाछादनादिभिः। दक्षिणाभिश्च देवेश तुष्यर्थं चक्रपाणिनः।६१। नित्यं भागवतं यस्तु
पुराणं पठते नरः। प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलं॥६२॥ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवं
यः पठेत्प्रातरुत्थाय गोसहस्रफलं लभेत्।६३। यः पठेत्प्रयतो नित्यं श्लोकं भागवतं मुने। अष्टादशपुराणानि
कार्त्तिके फलमाप्नुयात्॥ मालतीमालया विष्णुः पूजितो येन कार्त्तिके। पापान्तरस्त्वमामाला शौरिस्तद्दासमा
जिता।६५। मालतीमालया येन कार्त्तिके पुष्पमंडपं। केशवस्य पृष्ठे हे विप्र न मया विदितं फलं।६६। केतकीपत्र
मेकेन पूजितो गरुडध्वजः। समासहस्रं सुप्रीतो जायते मधुसूदनः। दमनकेनापि देवेशं संप्राप्ते मधुमाधवे। क
पिलागोसहस्रस्य फलं स लभते नरः।६८। मल्लिकाकुसुमैर्देवं वसन्ते गरुडध्वजं। योऽर्चयेत्परया भक्त्या मद
त्तापं प्रमार्जति। विष्णुमुद्दिश्य बिल्वपत्रं शिरसा यो वहेन्नरः॥ अपयुषितपापस्तु स तु न वेत्ति युगचतुष्टयं॥७०

अगस्तिकुसुमैर्देवं यजयेद्यो जनार्दनं। दर्शनात्तस्य देवश्च नरकाग्निं प्रनश्यति। ७१। मुनिपुष्पकृतां मालां योयच्छ
तिजनार्दनं देवेशो पिमुनिश्रेष्ठ करोति करसंपुटं। ७२। विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं। कार्तिके योर्चयेद
द्विष्णुं वाजिपेयफलं लभेत्। विल्वपत्रैश्च यः कृष्णं कार्तिके कलिनाशनं। हजयंति महाभक्त्या मुक्तिस्तेषां म
यो दित्ता। ७४। तुलसीदलपत्राणि यच्छंति त्रिजनार्दनं। कार्तिके सफलं वत्स पापं जन्मायुतं दहेत्। ७५। दृष्टा स्पृ
ष्टा च वा ध्याता कीर्तितानि सिता स्तुता। रोपिता सिंचिता नित्यं पूजिता तुलसी शुभा। ७६। नवधा तुलसीं भक्तिये
कुर्वंति जनार्दने। युगकोटिसहस्राणि तं वसंति हरेर्गृहे। ७७। रोपिता तुलसी यावत् कुरुते मूलविस्तरं॥ ता
वद्युगसहस्राणि तनोति सुकृतं मुने। ७८। यावत् शाखाप्रशाखाभिः बीजपुष्पदलैः मुनेः। रोपिता तुलसी पुनिव
र्द्धीते वसुधातले। ७९। तावद्युगसहस्राणि हरिलोके वसेन्नरः। पठनाश्रवणाद्यास्य अश्वमेधफलं लभेत्॥ ८०॥
॥ ॥इति ब्रह्मांडपुराणे श्रीकृष्णयुधिष्ठिरसंवादे कार्तिकस्य शुक्लप्रबोधिनीमाहात्म्यनाम॥२३॥ ॥छ॥ ४८
युधिष्ठिर उ॥ कार्तिके शुक्लपक्षे तु किंनामैकादशी भवेत्। को देवः को विधिस्तस्याः तन्मे ब्रूहि जगत्पते। १॥ ॥
श्रीकृष्ण उ॥ उत्तमा वासिते पक्षे तु पूजयेत् ईश्वरं॥ हरिप्रियाव सहितं। तिलपुष्पैश्च पांडवः। २। महाफलं
दद्यं नैवेद्यं गुडसर्पिषि। भूमिदानं च विप्राय विधिवत् कथिता मया। ३। एतानि वाक्यानि संपूर्णे एकादशी वि

पयानि त्रिस्पृशा द्वि विधा यथा। रजस्वलस्पसंगदूषिते। तथा दशमी संयुक्तं मद्दिनं वैष्णवं नृणां। उपोषणे दिने यु

क्तं यथा दैनयद्यान्नवेत्॥५॥ यथा द्रोरुणवे... पां दिने नान्ये नश्यते। तत्वायुत्तरा तं हंति मत्प्रसादेन लभ्यते॥ द

मत्प्रसादविज्ञानानां त्रिस्पृशा जातिजा फवी। एकादशी द्वादशी चरात्रिशेषे त्रयोदशी। त्रिस्पृशा सतु विज्ञेया द

शमी संयुक्ता नहि। सर्वापराधयुक्तस्य ने व्रायश्चित्ते कृते नरा।८। दशमी वेधज दोषं न स्तमामि सुरापगे। विमुक्ति

रहितं स्प्राक्षं यथा विफलतां व्रजेत्॥ मद्दिनं दशमीयुक्तं तथा विफलतां व्रजेत्। युक्तं हा तम्ह लं ते नस्यविसमेत्त

णकृतं।१०। दशमी मिश्रितं येन कृतमेकादशीव्रतं। इति मत्वा न कर्तव्यं मद्दिनं दशमीयुतं॥११॥ जन्मकोटिश

तं पुण्यं स स्वर्गा द्यातिसत्त्वयं॥ पातनं स्वकुलं स्वर्गात्रियने रौरवादिति।१२। घउदेशी धयित्वा तु कर्तव्यं मम वा

सरं। वेधो पोष्या वेध द्दिताश्रवणादि षु संयुक्ता।१३। उपोष्या द्वादशी नन्दे नो पोष्यै कादशी मता। पद्मा द्वावि शेष

णां संदेस मुपस्थिते।१४। ममाज्ञया प्रकर्तव्या वैष्णवा द्वादशी सदा। मद्दिने तद्विज्ञानां याद्दशमी वेधवर्जितं॥१५

गंगोवाच॥ करिष्येहं जगन्नाथ त्रिस्पृशा वचसात्तव। सर्वपापविनिर्मुक्ता प्रसादात्तव माधव।१६ श्री माधव उवाच॥

स्वस्थानं गच्छ भद्रं ते न भीकार्या त्वया शुभे। तव देहे सुरसरित्पापं संचरिष्यति॥१७। स्नात्वा सरस्वती तोयेत्र

चं यित्वा तु माधवं। सा गंगा वचसा तस्य गता स्वाश्रमनुत्तमं।१८। वेदव्यास उवाच। विधानं श्रृ दिमेव्रतान

मुनेयेन करोम्यहं। प्रसादयामि देवेशं परमानंददायिनं।१९। सनत्कुमार उ॥ दामोदरो हेममयो कार्यो विभवसारतः॥
पात्रं ताम्रमयं कार्यं तदुक्तैश्च प्रसरितं।२०। सजलं तु घटं सूत्रं पंचरत्नसमन्वितं। वेष्टितं पुष्पमालाभिः कुंकुमागरु-
संचितं।२१। स्नापयेद्दामोदरं पश्चात्तत्स्नापयित्वा विलेप्य च। परिधानं ततः कार्यं वस्त्रयुग्मेन काञ्चिजः।२२। मंत्रैस्तु
पूजनं कार्यं गुरुणा समुदारितैः। पुष्पैः कालोद्भवैः शुभ्रैः तुलसीदलकोमलैः।२३। छत्रं वै वैणवं दद्या पादुके चो-
पशोभिते। नैवेद्यं निमनोज्ञानि फलानि सुबहून्यपि।२४। उपवीतं तु दातव्यं सोत्तरीयं नवं दृढं। वैणवं दापयेद्दंडं
द्विजाय विष्णुरूपिणे।२५। दामोदराय पादौ तु जानुनी माधवाय च। गुह्यं कामपतये कटिं वामनमूर्तये।२६।
रुद्रयं ज्ञानगम्याय कंठं श्रीकंठसंगिने। सहस्रबाहवे बाहूंच हृषीयोगनायकः। ललाटमुरुगायेति सहस्र-
शिरसे नमः॥ स्वेन नाम्नायुधादीनि सर्वांगं चारुरूपिणे।२७। संपूज्य विधिवद्भक्त्या दद्यादर्घ्यं विधानतः। सूत्रेण
नालिकेरेणार्घ्योपरि स्थितेन हि। सूत्रेण वेष्टिते नैव पाणिभ्यां पुरतः स्थितः। नमो हरसि पापानि सत्यं च द्विजा-
र्दनः।३०। दुःस्वप्नं दुर्निमित्तं च मनसा दुर्विचिंतितं। नरकस्य भयं दुर्गतिसंभवं।३१। सज हित्वं महारवणे दि-
कं परलोकिकं॥ ते नमस्ते नमो रत्नाष्ट ह्राणार्घ्यं जनार्दनः।३२। सद्भक्तिं मम वास्तु दामोदरस्तवोपरि। धूपं दीपं
च नैवेद्यं कुर्यान्निराजनं ततः।३३। ततः शिरापरिभ्रमे। भ्रामयेति निराजनं॥ पूजयित्वा विधानेन पूजयेत्
स्वगुरुं ततः।३४। दद्याद्वस्त्राणि शुभ्राणि सोष्णीषं कंचुकं नवं। उपानहौ च छत्रं च कुंडिकां च कमंडलुं।३५

नयदेव

५९

भोजनं चैव तांबूलं सप्तधान्यसदक्षिणं। गुरुं संपूज्य देवेशं कुर्याज्जा रणं हरे।३५। गीतनृत्यसमायुक्तं कथाशास्त्र
समन्वितं। निशांते देवदेवेशं दत्त्वाचार्ये विधानतः।३७। स्नानादिकक्रियाः कृत्वा भुंजीत ब्राह्मणैः सह। अनेन वि
धिना राजन् त्रिस्पृशा सम्नव व्रतं।। यः करोति कलौ भक्त्या शृणु वक्ष्यामि तत्फलं। गंगा चगाहने व्यास वाराणस्यां
उ यत्फलं।३९। मन्वंतरसहस्रैस्तु त्रिस्पृशा वासरेण तु। कृती द्वियमुनास्नाने वर्षाष्टयुगकोटिभिः।४०। तत्फलंस
मवाप्नोति त्रिस्पृशाव्रतकं नरः। सूर्यग्रहणे जं तेभ्यस्तु यत्फलं कुरुजांगले।४१। हेमभारसहस्रैस्तु यत्फलं त्रिस्पृशा
दिने।। पापकोटिसहस्राणि पापकोटिशतानि च।४२। एकेनैकोपवासेन दह्यते त्रिस्पृशाकृता।। त्रिस्पृशायाव्र
तं कृत्वा दुर्गतिं न प्रयच्छति। गतिं गच्छति विप्रर्षे हित्वा यमयानि च। त्रिस्पृशायास्तु माहात्म्यं शृणोति पठते तथा
४४।। समग्रं फलमाप्नोति व्रतोत्तं वचनात् हरेः। स्वयं कृष्णेन पृष्ठितपाराशर्य समाग्रतः।४५। मुक्तिप्रविष्णपति
न्यासऽरिखित्वायः प्रयच्छति। पुन्यैरवाप्यते व्यास मन्वंतरशतैरपि।४६। त्रिस्पृशा दुर्लभा व्यास द्वापरे हि पु
ण्यकर्मणि। न कुर्वंति व्रतमिदं तेषां जन्म निरर्थकं।। जीवितं सफलं तस्य ये कुर्वंति व्रतोत्तमं। श्रेतस्वंतेनस
विनाश्राद्धे विनासुतैः।४८।। कृता ये त्रिस्पृशा व्यास सम्यक् सा मेक कलौ युगे।। महापापप्रशमनं सर्वदारिद्र्यना
शनं।। अपुत्रा पुत्रिणः संतु अपुत्राः सत्यपौत्रिणः।। निर्धनाः सधनाः संतु [illegible] दुराशदाशतं।।५०।। ।।७।।

च

॥ ॥इति श्रीपद्मपुराणे श्रीकृष्णयुधिष्ठिरसंवादे त्रिस्पृशामाहात्म्यं नाम कार्त्तिके हष्यासमाप्ताः ।२७। ॥छ॥
युधिष्ठिर उवाच ॥ वासुदेव जगन्नाथ भुक्तिमुक्तिप्रदायक । त्वयोक्ता विविधा धर्माश्चतुर्वर्गफलप्रदाः ॥१॥ एतान्नि
विविधा नैव गंगाफलप्रदायिनी ॥ उक्तानि पुत्रपौत्रादि सर्वाणि सौख्यकराणि च ।२। सांप्रतं श्रोतुमिच्छामि लोके
नयफलप्रदं । व्रतानां उत्तमं किंचित् यन्मोक्षैकसाधितव्यया ।३। श्रीकृष्ण उवाच ॥ उन्मयेकादशी नाम यज्ञकोटिफ
लप्रदा ॥ गयाप्रयागकुरुक्षेत्रादि तीर्थानि सफलान्यपि । उन्मयाव्रतदाराजन्कलां नार्हन्ति षोडशीं ॥ यथा तूल
समूलं च वह्नस्तोऽपि पावकः ॥ एवं पापसमूहं च उन्मयेकादशी हरेत् ॥ अन्या एकादशी सर्वा भुक्तिमुक्तिफ
लप्रदा ।५। विशेषतस्तु उन्मयाकुलकोटिसमुद्धरेत् ॥ युधिष्ठिर उवाच ॥ गोविंद जगदानंद सर्वभूतदयापरः
उन्मयेकादशी नाम कथं कार्या महीतले ॥७॥ यस्माज्जाता वा उन्मयेत । वर्णते भक्तवत्सलः ॥ किं दानं पूजनं
कस्य कथं च नियमो भवेत् ॥८॥ कस्मिन्मासे दशम्यां तु विधिर्वा किं किमुद्भवः ॥ श्रीकृष्ण उवाच ॥ कार्त्तिके तु कृष्णपक्षे
च व्रतं या तु विशेषतः ।१०। दशम्यां तु उलेः पर्कं विषान्नं भनोदरं । द्वादश्यां च तदेवान्नं पारणे च विशिष्यते
एवं च चतुरो मासान् कार्या एकादशी विवा । फाल्गुने मासि राजेंद्र यवैर्दशमिभोजनं । पारणेपि यवाहारो ए
काशनरतः सदा ॥ एवं मासचतुष्कं च कार्यं एकादशीव्रतं ।१२। आषाढे घृतदुग्धादि दर्भादशमि साधनं ॥ घो

५०

ॐ
अ॰रा॰आ॰
१

श्रीगणेशायनमः अथेतिदिनांदिनशेषं १ यत्रचंडकंविपिनंमुनिमंडलमंडितं तत्रगछामहेत्वमाज्ञातुरत्ता
ज्ञंकर्तुं २३ मार्गद्रष्टामागदर्शयिताः लोकानुसारिणः लोकवदहंत्वंनादपतः ४ वारितःनिवर्त्तध्वमितिश्र

श्रीगणेशायनमः अथतत्रदिनंस्थित्वाप्रभातेरघुनंदनः स्नात्वामुनिंसमामंत्र्यप्रयाणा
योपचक्रमे १ मुनेगछामहेसर्वेमुनिमंडलमंडितं विपिनंदंडकंयत्रत्वंमाज्ञातुमिहार्ह
सि २ मार्गप्रदर्शनार्थायशिष्यानाज्ञप्तुमर्हसि श्रुत्वारामस्यवचनंप्रहस्यात्रिर्महायशाः ३
सर्वस्यमार्गद्रष्टात्वंतवकोमार्गदर्शकः तथापिदर्शयिष्यंतितवलोकानुसारिणः ४ इति
शिष्यान्समादिश्यस्वयंकिंचितमन्वगात् रामेणवारितःश्रीसाअत्रिःस्वभवनंययौ ५ क्रो
शमात्रंततोगत्वाददर्शमहतीनदीं अत्रेःशिष्यानुवाचेदंरामोराजीवलोचनः ६ नद्याःसं
तरणेकश्चिदुपायोविद्यतेनवा ऊचुस्तेविद्यतेनौः सुसुदृढारघुनंदन ७ तारयिष्यामहेयु
ष्मान्वयमेवक्षणादिह ततोनाविसमारोप्यसीतांराघवलक्ष्मणौ ८ क्षणात्संतारयामासु
र्नदींमुनिकुमारकाः रामाभिनंदिताःसर्वेजग्मुस्तेत्रेःस्याश्रमं ९ तावत्सविपिनंघोरंझिल्लीझंकार
नादितंनानामृगगणाकीर्णंसिंहव्याघ्रादिभीषणं १० श्री रा म स म र्प

राम

र्यितिः ५ ६ ७ ८ रामाभिनंदिताःरामेणनंदपूर्वकंगछतेतिदत्तानुमातयः ९ झिल्लीझंकारोझिल्लीशब्द १०

११ सहितेनयुवाभ्यां॰ प्रि लितेनगंतव्यमित्युक्तेति शेषः दधत् अदधमित्यर्थः १२ साहित्यप्रकारमेवाहाग्रेइति आत्मपरात्मनोर्जीवेश्वयोर्मध्यगा अत्र पत्नविषयत्वाभ्यांसंबद्धामायेवेत्यर्थः १३ दृष्टं अपशकुनैः सूचितंननुश

राक्षसैर्घोररूपैश्चसेवितंरोमहर्षणं प्रविश्यविपिनंघोरंरामोलक्ष्मणमब्रवीत् ११ इतःपरं प्रयत्नेनगंतव्यंसहितेनमे धनुर्गुणेनसंयोज्यशरानपिकरेदधत् १२ अग्रेयास्याम्यहंपश्चात्त्वमन्वेहिधनुर्द्धरः आवयोर्मध्यगासीतामायेवात्मपरात्मनोः १३ चक्षुश्चारयसर्वत्रदृष्टंरक्षोभयंमहत् विद्यतेदंडकारण्ये अश्रुतपूर्वमरिंदम १४ इत्येवंभाषमाणौतौजग्मतुःसार्द्धयोजनं तत्रैकापुष्करिण्यास्तेकल्हारकुमुदोत्पलैः १५ अंबुजैःसतलोदनशोभमानाव्यदृश्यत तत्समीपमथोगत्वापीत्वातत्सलिलंशुभं १६ ऊषुस्तेसलिलाभ्यासेक्षणंछायामुपाश्रिताः ततोददृशुरग्रेयंतंमहासत्त्वंभयानकं १७ करालदंष्ट्रावदनंभीषयंतंस्वगर्जितैः वामांसेन्यस्तशूलाग्रग्रथितानेकमानुषं १८ भक्षयंतंगजव्याघ्रमहिषंवनगोचरं आरोपितंध

टी.रामायण ४९

कुनादिसूचकोविश्वासस्तत्राहश्रुतपूर्वमितिदंडकारण्ये पूर्वं ऋषीणांमुखात् श्रुतंरक्षोभयंविद्यतेशकुनैश्चतन्निश्चितमित्यर्थः १४ कल्हारसौगंधिकादियुक्ताएकापुष्करणीतत्रास्ते १५ साशोभमानातैर्व्यदृश्यतेत्यर्थः १६ महासत्त्वंमहाशरीरंप्राणि १७ करालदंष्ट्रायुतंवदनंयस्यततं वामांसेवामस्कंधेन्यस्ताःशूलाग्रग्रथिताअनेकमानुषायेनततं गजव्याघ्रमहिषमितिसमाहारद्वंद्वः इत्यां आरोपितायस्मिन्ततं १८

उं०

श्रा०रा०श्रा०
२

आग्रेसंमुखदेशेवर्तमानोऽस्मदभिमुखमापातिभीरूणांभयमावहन्नित्यनेननास्माकंभयमितिध्वनितं २०
अचलइवरामःस्थितइत्यन्वयः २३ २२ वक्रप्रतिष्ठकवलेपमावित्यनेनसुकरवधत्वंध्वनइतिग्रालादुष्टाहिंस्रजी

पश्चाभ्रातर्महाकायोराक्षसोयमुपागतः आयात्यभिमुखंमोग्रेभीरूणांभयमावहन् २० स
जीवसधनुस्तिष्ठमाभैर्जनकनंदिनि इत्युक्तावाणमादायस्थिरोरामइवाचलः २१ सुतुदृष्ट्वा
रमानाथंलक्ष्मणंजानकींतदा अट्टहासंततःकृत्वाभीषयन्निदमब्रवीत् २२ कौजवांचापतूणी
रजटावल्कलधारिणौ मुनिवेषधरौवालौस्त्रीसहायौसुदुर्मदौ २३ सुंदरौवत्तमेवक्रप्रविष्टक
मलोपमौ किमर्थमागतौघोरंवनंव्यालनिषेवितं २४ श्रुत्वारक्षोवचोरामःस्मयमानउवाच
तं अहंरामस्वयंभ्रातालक्ष्मणोममसंमतः २५ एषासीताममप्राणहृद्भावयमागता पितृ
वाक्यंपुरस्कृत्यशिक्षणार्थंभवादृशां २६ श्रुत्वातद्रामवचनंमट्टहासमथाकरोत् व्यादायवक्त्रं
वाहुभ्यामुल्लमादायसत्वरः २७ मांनजानासिरामत्वंविराधोविश्रुतं मत्त्यान्मुनयःसर्वेवि
स्मावमितोगताः २८ इत्युक्त्वाराक्षसःसीतामादातुमभिदुद्रुवे ३० रामश्चिच्छेदतद्वाहूशरेण
प्रहसन्निव ततःक्रोधपरीतात्माव्यादायविकटंमुखं ३१ राममभ्यद्रवद्रामश्चिच्छेदपरि
धावतः पदद्वयंविराधस्यतदद्भुतमिवाभवत् ३२ ततःसर्पइवाद्रूपेनग्रसितुंराममापतत्
ततोर्धचन्द्राकारेणनास्यमहच्छिरः ३३

मरिजीवितमिच्छामि निर्यास्यामि ततो
पुरुषौ पद्मपत्राक्षौ

रामः

वाः २४ २५ २६ २७ २८ जीवितुमिच्छास्तिपुवयोरितिशेषः शीघ्रंपलायतंनचेद्भक्षयामीत्यन्वयः २९ ३० ३१ ३२

२

रुधिरौघेणसहतच्छिरौघेणसहतच्छिरोभूतलेपातेसन्वयः ३४ ३५ विराधकायान्निःसृतइतिशेषःविमलांबरंनि
र्मलवस्त्रंतेनाचृतःचामीकरंसुवर्णं ३६ भवप्रवाहस्यसंसारप्रवाहस्योपरमोनाशोयस्मात्तंघृणायाःदयायाःआकर

चिच्छेदरुधिरौघेणपतातधरणीतले ततःसीतासमालिंग्यप्रशशंसरघूत्तमं ३४ ततोदुंदुभयो
नेदुर्दिविदेवगणेरिताः ननृतुश्चाप्सरोहृष्टाजगुर्गंधर्वकिंनराः ३५ विराधकायादतिसुंदराकृ
तिर्विभ्राजमानोविमलांबरावृतः प्रतप्तचामीकरचारुभूषणोव्यदृश्यताग्रेगगनेरविर्यथा ३६
प्रणम्यरामंप्रणतार्तिहारिणंभवप्रवाहोपरमंघृणाकरं प्रणम्यभूयःप्रणनामदंडवत्प्रपन्न
सर्वार्तिहरंप्रसन्नधीः ३७ विराधउवाच श्रीरामराजीवदलायताक्षविद्याधरोहंविमलप्रका
शः दुर्वाससाकारणकोपमूर्तिनाशप्तःपुरासोद्यविमोचितस्त्वया ३८ कथामृतंपातुकरद्वयंते
पादारविंदार्चनमेवकुर्यात् शिरश्चतेपादयुगप्रणामंकरोतुनित्यंभवदीयमेव ४० + इतःपरं
त्वच्चरणारविंदयोःस्मृतिःसदामेस्तुभवोपशांतये त्वन्नामसंकीर्तनमेववाणीकरोतुमेकर्णपु
टत्वदीयं ३९

णकोपमूर्तिनानिनिमित्तकोपवन्मूर्तिना: ३८ मेकर्णपुटंत्वदीयंकथामृतंपातुइत्यन्वयःपिवत्वित्यर्थःसादरंश्रणोत्वि
त्यर्थः पिवादेशाभावश्चार्षः ३९ एवंमदंगजातंसर्वंभवदीयमेवास्तुभवत्सेवास्त्वित्यर्थः ४० श्री रा म ७२

आत्मनिस्वरूपेआरमंतेतस्मैसर्वदातदनुसंधानवतेइत्यर्थः ४१ इत्यंतीप्रार्थितमायेसादि ४२ ४३ अशेषामा
यादोषरूपालोकेगुणास्तैस्तैर्नलोकप्रसिद्धास्त्वयामद्दर्शनाजिताः अथत्वंज्ञानवतांवरोभूत्वामुक्तोभविष्यसीति

नमस्तुभ्यंभगवतेविभुद्धज्ञानमूर्तये आत्मारामायरामायसीतारामायवेधसे ४१ प्रप
न्नंपाहिमांरामयास्यामित्वदनुज्ञया देवलोकंरघुश्रेष्ठमायामांमावृणोतुते ४२ इतिवि
ज्ञापितस्तेनप्रसन्नोरघुनंदनः ददौवरंतदाप्रीतोविधायमहामतिः ४३ गच्छविद्या
धराशेषमायादोषगुणाजिताः त्वयामद्दर्शनात्सद्योमुक्तोज्ञानवतांवरः ४४ मद्भक्ति
र्दुर्लभालोकेजाताचेन्मुक्तिदायतः अतस्त्वंभक्तिसंपन्नःपरंयाहिममाज्ञया ४५ रामेणर
क्षोनिधनंसुघोरंशापाद्विमुक्तिंवरदानमेवं विद्याधरत्वंपुनरेवलब्धंरामंगृणन्नेतिनिरा
खिलार्थान् ४६ इतिश्रीआरण्यकांडेप्रथमसर्गः १ विराधस्वगतेरामोलक्ष्मणेन
चसीतया जगामशरभंगस्यवनंसर्वसुखावहं १ शरभंगस्ततोदृष्ट्वारामंसौमित्रिणास
ह आयांतंसीतयासार्द्धंसंभ्रमादुत्थितःसुधी २

शेष ४४ परंमाक्षंयाहिप्राप्नुहि ४५ रामेणरक्षोनिधनंकृतंतेननिधनेनतस्यरक्षसः शापाद्विमुक्तिःकृता
तस्मैवंवरदानचकृतंयतस्तेनपुनरेवविद्याधरत्वंलब्धंअतोरामंगृणन्नराखिलार्थान्नेतिप्राप्नोति ४६ इतिटीकाप्र

आयांतं आगतं आगतं अभिगम्य: संमुखगमनपूर्वकं तमानीय उपवेशयत् अउभाव आर्षः ३ आसंस्थितः तप सेतपः कर्तुं कृतनिश्चयः ४ तवदर्शनाकांक्षाऽइहैवासमितिपूर्वेणान्वयः यतः त्वंयमेश्वरः मोक्षदः ५ विरक्तः सन्

अभिगम्यसुमंपूज्यविष्टरेषूपवेशयत् आतिथ्यमकरोत्तेषांकंदमूलफलादिभिः ३ श्री साहशरभंगोपिरामंभक्तपरायणं बहुकालमिहैवासंतपसे कृत निश्चयः ४ तवसंदर्श नाकांक्षीरामत्वपरमेश्वर अद्यमत्तपसासिद्धं यत्पुण्यंबहुविधंते तत्सर्वंतवदास्यामि ततोमुक्तिं व्रजाम्यहे ५ समर्प्यरामस्यमहत्सुपुण्यफलंविरक्तःशरभंगयोगी चितिंस मारोहयदग्रमेयंरामंससीतंसहसाप्रणम्य ६ ध्यायन्नुचिरंराममशेषहृत्स्थंदूर्वादल श्यामलमंबुजाक्षं चीरांबरंस्निग्धजटाकलापंसीतासहायंसहलक्ष्मणंतं ७ को वादयालुःस्मृतकामधेनुरन्योजगत्यांरघुनायकाद्धौ स्मृतोमयानित्यमनन्यभाजा लामृतिमस्वयमेवयातः ८ पश्यत्विदानींदेवेशोरामोदाशरथिःप्रभुः दग्ध्वास्वदे

शोभनंपुण्यं हिंसारहितत्वात्तपस्तत्फलंरामस्यसमर्प्यदत्वासरुसातत्क्षणमेवचितिंसमारोहयत्समारूढ तत्वतप्रेषणाणिच ६ अशेषहृत्स्थसर्वेतर्यामिणं सहलक्ष्मणंसमस्तलेपिवापसर्जनसमितिसादशाभावः ७ स्मृतकामधेनुःस्मृतःसन्कामधेनुस्ततुल्यासर्वमनोरथपूरकत्वात् यतः आगमनः ८ ब्रह्मलोकं उपासकत्वान्मोक्षदा

टीका ८ श्रीरामः

उँ०
अ॰रा॰आ॰
४

१० पुरतः स्थितं दृष्ट्वा तादृशमेव हृदये ध्यातवांश्च ११ लोकपतेः कार्यं ब्रह्मणः हिरण्यगर्भस्य शरभंग निवेशनं तदाश्र
ममाजग्मुरित्यन्वयः १२ भूमौ दंडवत्पतिताः प्रणेमुः १३ १४ लक्ष्मणं शेषं शंसामि इत्यन्वयः १५ अतः भूमिदुःखहरणार्थ

अयोध्याधिपतिर्मेस्तु हृदये राघवः सदा । यद्वामांके स्थिता सीता मेघस्येव तडिल्लता १० इति
॥ क्ष्ये तवाग्रतः ॥ भव सत्यप्रतिज्ञस्त्वमेतत्सममप्रियं ॥२२॥ श्रुत्वैतद्दारुणं वाक्यं कैकेय्या रोम
॥ हर्षणं ॥ निपपात महीपालो वज्राहत इवाचलः ॥२३॥ शनैरुन्मील्य नयने विमृज्य परया भिया ॥
॥

रोमहर्षणं श्रुत्वैव तां रोमांचोत्पादकमतिक्रूरत्वात् ॥२३॥ परयाउत्कृष्टया केकयी प्रियानेत्रे विमृज्याश्रुरहिते कृ
त्वा सा कैकेयी त्वं दृष्ट्वा। तीक्ष्णक्रोधेन रामं बंधवा प्रार्थ्यते दिगुणिका भीः निरस्ते तिपाठे पतनवेलायां पराङ्मुखत्वात् पतनात् उ
त्तरी सा भियैव कटिगतितं सम्मुखी भूयेत्यर्थः ॥ पुनर्मनुष्यदेहधरा पामरा य यियाः एवं क्रोधो र्यास्त भवं पपति लोच्य दुःख
भरतीनर्कः जाग्रतः स्वप्नानुभावानां भवाराद्धः ॥ अर्थे वाममेव चित्तस्य विभ्रमः आम्यार्थकस्यान्यार्थकत्वमात्रैः ॥२४॥

१०

१०

इतिविचार्यतिशोषः पुरः स्थितां व्याघ्रीमिव पुरः पत्नीं कैकेयीमालोक्य दृष्ट्वा तदुक्तं तत्वनिर्णयाय तामाहेतिशेषः।
किमाहेत्यत्राह ॥ किमिदमिति ॥ ममप्राणहरमिसनेन स्ववैधव्यसंपादकत्वेनासंतस्त्वानिष्टं भाषसइत्यर्थः ॥२५॥
ननु रामकृतातिदुःसहापराधवशात्स्वानिष्टमपिमयाउक्तमित्यत्राह ॥ रामइति ॥ अपराधाकरणं प्रागुक्तत्वदवचनैरेवनि

॥ इत्यालोक्य पुरः पत्नीं व्याघ्रीमिव पुरस्थितां ॥ किमिदं भाषसे भद्रे ममप्राणहरं वचः ॥२५॥

म

॥ रामः किं पराधं ते कृतवान्कमलेक्षणः ॥ ममाग्रे राघवगुणान्वर्णयस्य निशं शुभान् ॥२६॥ को
॥ शल्यां मांसमेपश्यन्शुश्रूषां कुरुते सदा ॥ इति ब्रुवंती त्वं पूर्वमिदानीं भाषसेन्यथा ॥२७॥ रा
॥ ज्यं गृहाण पुत्राय रामस्तिष्ठतु मंदिरे ॥ अनुगच्छेष्ठ मां वामेरामान्नास्ति भयं तव ॥२८॥ इत्यु
॥ क्त्वाश्रुपरीताक्षः पादयोर्निपपातह ॥ केकेयीमब्रुवाचेदं मापिरक्तांतलोचना ॥ २९॥

रीतिमित्याह ॥ ममेति ॥२६॥ इदानीमन्यथा भाषसे अतः पूर्वापरविरोधादिदं त्वद्वचो अश्रद्धेयमित्यर्थः ॥२७॥
यदिराज्यफलोभयस्तत्राह ॥ राज्यमिति रामस्येह स्थिता वपि न ते भयमित्यर्थः ॥ वामे मदिच्छाचरणशीले ॥२८॥
सापिकैकेयी पूर्वं तादृशी भाषणशीलापि मंथरयापि केकेयी दैववाण्याविशावशाद्रक्तांतलोचना सती राजानं प्रत्युवा
च ॥२९॥ श्रीरामराजीवपत्राक्षकरुणाकर दयालो सत्यप्रतिज्ञ सुव्रत सुमुख संसारसागरान्मामुद्धर ॥

उक्तप्रतिताश्च सर्वमुक्तं ॥३०॥ मिथ्याभाषणजन्योनरकोस्त्येव पुनः पापान्तरजनरकमपि दर्शयितिवनमिति ॥ अजि
नमेवचीरवस्त्ररपि वल्कलेनेनयुक्तः ॥३१॥ विडंबसम्श्लोघसरामोपरीक्षनेन भगवच्छपथो मिथ्यात्वमारूढ इति ध्वनयति ॥ प

॥ राजेन्द्र किं त्वं भ्रांतोसि उक्तं तच्छपसेन्यथा ॥ मिथ्याकरोषि चेत्त्वीयं भाषितं नरको भवेत् ॥३०
॥ वनं न गच्छ यदि रामश्चंद्रः प्रभातकाले जिनचीरयुक्तः ॥ उद्बंधनं वापि विषभक्षणं वा कृत्वा मरिष्ये
॥ पुरतस्तवाहं ॥३१॥ सत्यप्रतिज्ञोहमिति हि लोके विडंबसे सर्वसभान्तरेषु ॥ रामोपरि स्नेहवशात्त्वमेव
॥ कृत्वा मिथ्या प्रतिज्ञो नरकं प्रयाहि ॥३२॥ इत्युक्तः प्रियया दीनो मग्नो दुःखार्णवे नृपः ॥ मूर्छि
॥ तः पतितो भूमौ विसंज्ञो मृतकायथा ॥३३॥ एवं रात्रिर्गता तस्य दुःखात्संवत्सरोपमा ॥ अ
॥ रुणोदयकाले तु बन्दिनो गायका जगुः ॥३४॥ निवारयित्वा तान् सर्वान् कैकेयी रोषमास्थिता ॥
॥ ततः प्रभातसमये मध्यकक्षामुपास्थिताः ॥३५॥ ब्राह्मणाः क्षत्रिया वैश्या ऋषयः कन्य
॥ कास्तथा ॥ छत्रं च चामरं दिव्यं गजो वाजी तथैव च ॥३६॥ अन्याश्च वारमुख्यायाः पौरा जानपदा-

स्तथा ॥ वसिष्ठेन यथादिष्टं तत्तथैव
नत्रमो स्थित ॥३७॥

॥३२॥३३॥३४॥ तान् वंद्यादीन् गायकान् त्रिवर्ग विषये राज्ञा निवार्य स्थितासीत् ततः समये जातेपि रामे कार्यविनाय नेम
प्रेषयति तीसाधिकारेषु ॥३५॥३६॥३७॥ राम ॥

॥३८॥ किरीटकटकानिज्वलानिशोभावंतियतंबर्धान्तं॥३९।४०।४१।सुमंत्रइति। प्रजानांतादृशीं चिंतांज्ञात्वास्व

॥ स्त्रियोबालाश्चवृद्धाश्चरात्रौनिद्रांनलेभिरे ॥ कदाद्रक्ष्यामहेरामंपीतकौशेयवाससं ॥ ३८॥ सर्वा
॥ भरणसंपन्नंकिरीटकटकोज्वलं ॥ कौस्तुभाभरणंश्यामंकंदर्पशतसुंदरं ॥ ३९॥ अभिषिक्तं
॥ समायांतंगजारूढंस्मितावनं ॥ श्वेतछत्रधरंतत्रलक्ष्मणंलक्ष्मणान्वितं ॥४०॥ रामंकदावा
॥ द्रक्ष्यामः प्रभातंवाकदाभवेत् ॥ इत्युत्कधियः सर्वेवभूवुःपुरवासिनः ॥ ४१॥ नेदानींमुषि
॥ तोराजाकिमर्थंचैविनिचिंतयन् ॥ सुमंत्रःशनकैःप्रायाद्यत्रराजावतिष्ठते ॥ ४२॥ वर्द्धयन्जय
॥ शब्देनप्रणमन्शिरसान्टपं ॥ अतिखिन्नंन्टपंदृष्ट्वाकैकेयींसमपृच्छत ॥ ४३॥ देविकैकेयिव
॥ र्द्धस्वकिंराजादृश्यतेन्यथा ॥ तमाहकैकेयीराजारात्रौनिद्रांनलब्धवान् ॥ ४४॥ रामरामेतिरा
॥ तिराममेवानुचिंतयन् ॥ प्रजागरेणवैराजाह्यस्वस्थइवलक्ष्यते ॥ ४५॥ राममानयशीघ्रंत्वंरा
॥ जाद्रष्टुमिहेच्छति ॥ ४५॥ सुमंत्रउवाच ॥ अश्रुत्वाराजावचनंकथंगच्छामिभामिनि ॥ तच्छ्रुत्वा
मंत्रिणोवाक्यंराजामंत्रिणमब्रवीत् ॥ ४६॥

स्थमपिचिंतयन्निसर्थः ॥४२।४३॥ अन्यथाशोकवान्अस्वस्थश्च ॥ ४४॥ ४५॥ भामिनिकोपनेसर्थः ॥ कोपनासे
वभामिनीतिनिघंटुः ॥ ४६॥ राम ॥

॥४७॥ अतिरक्तत्वात्प्रिमत्वाच्च द्वारपालैरवारितः ॥४८॥ ४९॥ पश्यन्नेव पितरं दर्शनमात्रेण चक्षुषैव ते मां शिष्या

॥ सुमंत्रा रामं द्रक्ष्यामि शीघ्रमानय सुंदरं ॥ इत्युक्तस्त्वरितं गत्वा सुमंत्रो राममंदिरे ॥ ४७ ॥ अवारितः

॥ प्रविष्टोयं राममब्रवीत् ॥ शीघ्रमागच्छ भद्रं ते राम राजीवलोचन ॥ ४८ ॥ पितुर्गेहं मया सार्धं राजा

॥ त्वां द्रष्टुमिच्छति ॥ इत्युक्तो रथमारुह्य संभ्रमात्त्वरितं ययौ ॥ ४९ ॥ रामः सारथिना सार्धं लक्ष्मणे

॥ न समन्वित ॥ मध्यकक्षे वसिष्ठादीन् पश्यन्नेव त्वरान्वितः ॥ ५० ॥ पितुः समीपं संगम्य ननामच

न

॥ रणौ पितुः ॥ राममालिंगितुं राजा समुत्थाय ससंभ्रमः ॥ ५१ ॥ बाहू प्रसार्य रामेति दुःखान्मध्ये

॥ पपात ह ॥ हाहेति रामस्तं शीघ्रमालिंग्यांके न्यवेशयत् ॥ ५२ ॥ राजानं मूर्छितं दृष्ट्वा चक्रुशु

॥ सर्वयोषितः ॥ किमर्थं रोदनमिति वसिष्ठोपि समाविशत् ॥ ५३ ॥ रामः पप्रच्छ किमिदं राज्ञो दुः

१२

॥ खस्य कारणं ॥ एवं पृच्छति रामे सा कैकेयी राममब्रवीत् ॥ ५४ ॥ त्वमेव कारणं ह्यत्र राज्ञो दुःखोप

॥ शांतये ॥ किंचित्कार्यं त्वया राम कर्तव्यं नृपते हितं ॥ ५५ ॥

चारं कुर्वन्नित्यर्थः ॥ ५० ॥ ससंभ्रमः सादरः ॥ ५१ ॥ दुःखात् भाविरामविरहदुःखात् ॥ ५२ ॥ समाविशत् राजगृ

१२

हं प्राविशत् ॥ ५३ ॥ ५४ ॥ राज्ञो दुःखोपशांतये तदर्थं त्वमेव कारणं ॥ तदेव कारणत्वं भ्रमभर्यंयति किंचिदिति ॥ ५५ ॥

कार्यमिवाहसत्यप्रसङ्गात् नित्यं दण्डकागमनविषयेसत्यप्रतिज्ञो भवत्वाइत्यर्थः ॥ ५६ ॥ तत्सर्वं तद्वरद्वयानुष्ठानंत्वदधीनं

॥ कुरुसत्यप्रतिज्ञस्त्वंराजानंसत्यवादिनं ॥ राज्ञावरद्वयंदत्तंममसंतुष्टचेतसा ॥ ५६ ॥ त्वदधीनं
॥ तुतत्सर्वंवक्तुंत्वांलज्जतेन्नृपः ॥ सत्यपाशेनसंबद्धंपितरंत्रातुमर्हसि ॥ ५७ ॥ पुत्रशब्देनचैवे
॥ तद्धिनरकात्त्रायतेपिता ॥ रामस्तयोदितंश्रुत्वा शूलेनाभिहतोयथा ॥ ५८ ॥ व्यथितःकैक
॥ यीमाहकिंमामेवंप्रभाषसे ॥ पितुरर्थेजीवितंदास्येपिवेयंविषमुल्बणं ॥ ५९ ॥ सीतांत्यक्ष्येथ
॥ कौसल्यांराज्यंचापित्यजाम्यहं ॥ अनाज्ञप्तोपिकुरुतेपितुःकार्यंसउत्तमः ॥ ६० ॥ उक्तःकरो
॥ तियःपुत्रःसमध्यमउदाहृतः ॥ उक्तोपिकुरुतेनैवसपुत्रोमलउच्यते ॥ ६१ ॥ अतःकरोमि
॥ तत्सर्वंयन्मामाहपितामम ॥ सत्यंसत्यंकरोम्येवरामोद्विर्नाभिभाषते ॥ ६२ ॥ इतिरामप्रतिज्ञांसा
॥ श्रुत्वाकेकयीप्रचक्रमे ॥ रामत्वदभिषेकार्थंसंभाराःसंभृताश्चये ॥ ६३ ॥ तैरेवभरतोवश्य
॥ मभिषेच्यःप्रियोमम ॥ अपरंचवल्कवेरणाश्चचीरवासाजटाधरः ॥ ६४ ॥ श्रीराम ॥

तःसत्यपाशेनेति ॥ ५७ ॥ पुत्रशब्देनतदुच्यतेनदपुत्रइति ॥ अर्थइतिभावः ॥ ५८ ॥ पिवेयंविषंपित्राज्ञायेति
श्रेषः ॥ ५९ ॥ यःकुरुतेसउत्तमइत्यर्थः ॥ ६० ॥ मलोमलसदृशः ॥ ६१ ॥ ६२ ॥ ६३ ॥ तैर्भरतोवश्यमभिषेच्यः/

(margin) [illegible] ॥ ६३ ॥

समाः चर्षाणि ॥ ६५।६६॥ राजा किं केन कारणं नेह विषये मां न वक्ति तत्कारणं न जाने अकर्त्तव्यता अभावनीया
मय्य भावादिति भावः ॥ ६७॥ दुःखितं राज्ञो वचनेन दुःखितं ॥ ६८॥ ज्येष्ठात्पिण्डिघक निष्टाय राज्यग्रहन रूपे उ

॥ वनं प्रयाहि शीघ्रं त्वमद्यैव पितुराज्ञया ॥ चतुर्दश समास्तत्र वस मुन्यन्न भोजनः ॥ ६५ ॥ एतदेवापि
॥ तुस्थिप कार्यं त्वं कर्त्तुमर्हसि ॥ राजा तु लज्जते वक्तुं तां मे वं रघुनन्दन ॥ ६६॥ श्रीराम उवाच ॥ भर्त्ता २
॥ स्यैव राज्यं स्याद्धं गच्छामि दण्डकान् ॥ किंतु राजा न वक्ति मां ... जाने तत्कारणं ॥ ६७॥ श्रुत्वैतन्मा
॥ मकं वचनं दृष्ट्वा रामं पुरः स्थितं ॥ प्राह राजा दशरथो दुःखितो ... खितं वचः ॥ ६८ ॥ स्त्रीजितं भ्रां
॥ तहृदयमुन्मार्गपरिवर्त्तिनं ॥ निगृह्य मां गृहाणेदं राज्यं पापं न तद्भवेत् ॥ ६९ ॥ एवं चेदनृतं
॥ नैव मां स्पृशेद्रघुनन्दन ॥ इत्युक्त्वा दुःखसंतप्तो विललाप नृपस्तदा ॥ ७० ॥ हा राम हा जगन्ना
॥ थ हा मम प्राणवल्लभ ॥ मां विसृज्य कथं घोरं विपिनं गन्तुमर्हसि ॥ ७१॥ श्रीरामचंद्राय नमः ॥

न्मार्गवर्त्तमानं अत एव भ्रांतहृदयं स्त्रीजितं च पापं न तद्भवेत् दिनिगृह्य राज्यं गृहाण तस्य कार्याकार्यमजानतः ॥ असत्यं
प्रतिपन्नस्य दण्ड एव विधीयत इति नीतिसुत्केः ॥ ६९॥ त्वया बलात्कारेण ग्रहणान्ममपेत वचन दशनात् तदनृतं नरो
षरस्याह ॥ एवं चेदिति ॥ ७०॥ यद्यपि तव जगन्नाथत्वात् सन्याविपिनयाः समते तथापि त्वद्वियोगे मम प्राणा स्थ
दल्लभ त्वात्तया सह गमिष्यंतीत्याह ॥ मम प्राणवल्लभेति ॥ ७१॥

विसर्ज्यनिरस्ताश्रुकेकृत्वा ॥ ७२ ॥ शासतिविसार्पेहमनुजेनापिराज्यकरणेन स्थापितत्वपुत्रत्वाललेभक्तत्वाच्चात्र
ति दुःखस्यौभावः ॥ ७३ ॥ ७४ ॥ ममसुरत्वविशिष्टदेहत्वत्सत्सपालनरूपंकार्यंविभविष्यतीति अधिकोल मरति

॥ इतिरामंसमालिंग्यमुक्तकंठोरुरोदह ॥ विसर्ज्यनयनेरामः पितुः सजलपाणिना ॥ ७२ ॥ आ
॥ श्वासयामासनृपश्शनैः सनयकोविदः ॥ किमत्रदुःखेनविभोराज्यंशास्तुमेनुजः ॥ ७३ ॥ अ
॥ हंप्रतिज्ञानिस्तीर्यपुनर्यास्यामितेपुरं ॥ राज्यात्कोटिगुणंसौख्यंममराजन्वनेसतः ॥ ७४ ॥ त्व
॥ त्सत्सपालनंदेवकार्यंचापिभविष्यति ॥ कैकेयाश्चप्रियोराजन्वनवासोमहागुणः ॥ ७५ ॥ इदा
॥ नीगंतुमिच्छामिव्येतुमातुश्चहृज्ज्वलः ॥ संभाराश्चोपक्रियंतामभिषेकार्थमागताः ॥ ७६ ॥
॥ मातस्त्वंसमाश्वासयअनुनीयचजानकीं ॥ आगत्यपादौवंदिष्येऽन्तेवयास्येसुखंवनं ॥ ७७ ॥ इत्यु
॥ क्त्वानुपरिक्रम्यमातरंस्पष्टुमाययो ॥ कौशल्यापिहरेःपूजांकुरुतेरामकारणात् ॥ ७८ ॥ श्रीराम ॥

श्लेषेणदेवानांकार्यंनरक्षोमनोशरूपंभविष्यतीति ध्वनिनंकैकेय्याश्चप्रियोतोमहागुणाः बुद्ध्युगुणस्सर्वः ॥ ७५
इदानीमिदानीमेवसर्वः । उपक्रियंतांढौकीयंतां ॥ ७६ ॥ सुखमिसनेनममवनगमनेदुःखलेशोपिनास्तीति ध्वनि ॥ ७७ ॥
रामकारणात् । रामाभिषेकाविघ्ननिवृत्तिनिमित्त ॥ ७८ ॥

एकाग्रमनसोक्तफलार्थमेव विष्णुं ध्यायते च ॥ आत्मनेपदं ध्यायतिः अतः ॥७९॥ अंतस्थं अंतर्यामितया हृद
यस्थितं ध्येयं रूपमाह ॥ घनेत्यादि निरस्तेत्यादिना निर्विकल्पकसमाधिस्थत्वमुक्तं सकलविशेषरहितध्यानमेव नि

१४

॥ होमं चकारयामास ब्राह्मणेभ्यो ददौ धनं ॥ ध्यायते विष्णुमेकाग्रमनसा मौनमास्थिता ॥७९॥
॥ अंतस्थमेकं घनचित्प्रकाशं निरस्तसर्वातिशयस्वरूपं ॥ विष्णुं सदानंदमयं हृदब्जे सा भावयंती
॥ न ददर्श रामं ॥८०॥ इति श्रीअयोध्याकांडे तृतीयः सर्गः ॥ ततः सुमित्रा दृष्ट्वैनं रामं राज्ञीं स

व

॥ संभ्रमा ॥ कौशल्यां बोधयामास रामोऽयं समुपस्थितः ॥ श्रुत्वैव रामनामैषा बहिर्दृष्टिप्रवाहिता ॥
॥ रामं दृष्ट्वा विशालाक्षमालिंग्यांके न्यवेशयत् ॥२॥ मूर्ध्न्यवघ्राय पस्पर्श गात्रं नीलोत्पलच्छ
॥ वि ॥ भुंक्ष्व पुत्रेति च प्राह मिष्टमन्नं क्षुधार्दितः ॥३॥ रामः प्राह न मे मातर्भोजनावसरः कुतः
॥ दंडकागमने शीघ्रं मम कालोऽयं निश्चितः ॥४॥

विकल्पकत्वात् निरस्तानि सर्वाणि अतिशयस्वरूपाणि भेदकस्वरूपाणि येन तल्लक्षणार्थः ॥८०॥ इति तृतीय
सर्गः ॥ ॥ ४ ससंभ्रमं मा मा सा सा सुमित्रा राज्ञीं कौशल्यां बोधयामास इत्यन्वयः ॥१॥ बहिर्दृष्टिप्रवाहिता
त्यक्तसमाधिरित्यर्थः ॥२॥ भुंक्ष्व पुत्र । तीति । अद्भुतवत्सावात्संधिः ॥३॥ भोजनावसरो न कुतः पित्रेति शेषः ॥
निश्चितः कृतः पित्रेति शेषः ॥४॥

५ सुतिवेषः चीरवासस्त्वकारिकंचिंतांमद्विषयांकर्तुनार्हसि ६ सल्लतामग्ना ७ क्षणार्द्धंणार्द्धमपि ८ बा
लकमसंतवालंवत्सशब्दोहिगवापसेरूढः ९ सजाराज्ञ्मंप्रपच्छाविषयत्वात् किमर्थमितिनहितेनकिंचिर्भ
रतेष्टमिभावः १० त्वयाकिमपराद्धंयत्वांवनायस्थापयतीतिशेषः ११ यथापितागुरुस्तथाहमपितवगुरु

कैकेयीवरदानेनसत्यसंधःपितामम भरतायददौराज्यंममाप्पारण्यमुत्तमं ५ चतुर्द
शसमास्तत्रत्युषित्वामुनिवेषधृक् आगमिष्येपुनःशीघ्रंनचिंतांकर्तुमर्हसि ६ यदिरा
मवनंसंयासिचेन्नयमोमपि त्वद्विहीनाक्षणार्द्धंवाजीवितंधारयेकथं ८ + तच्छ्रुत्वा
सहसोद्विग्नामूर्छितापुनरुत्थिता आहरामंसुदुःखार्त्तादुःखसागरसंप्लुता ७ यथागोर्वा
लकंवसंत्यक्तातिष्ठेन्नकुत्रचित् तथैवत्वांनशक्नोमिसत्तुंप्राणात्प्रियंसुतं ९ भरताय
प्रसन्नश्चेद्राज्यंराजाप्रयच्छतु किमर्थंवनवासायत्वामाज्ञापयतिप्रियं १० कैकेयावरदो
राजासर्वस्वंवाप्रयच्छतु त्वयाकिमपराद्धंहिकैकेय्यावानृपस्यवा ११ पित्राज्ञप्तोवनंगंतुंवा
रयेयमहंसुत १२ यदिगच्छसिमद्वाक्यमुल्लंघ्यनृपवाक्यतः तदाप्राणान्परित्यज्यगच्छा

र्यद्वाततोधिकापितुर्दशगुणंमातागौरवेणातिरिच्यतइतिस्मृतेस्मृतेःएवंचमदाज्ञयावनागमननमेवोचितमितिभा
वः १२ तदाप्राणानिति एवंचमातृवधदोषोवनगमनेधिकइतिभावः १३ श्री रा म

रूपाद्दहत्वित्यन्वयः १४ भ्रांतमनसंराज्यलोभेन अतएववैकेयीवशवर्त्तिनं १५ पुरालोकान्प्रदहतःकालाग्नि रुद्रस्येवेत्यर्थः अनेनतद्दवतारत्वंस्वस्यसूचितं १६ तत्राभिषेकेविघ्नारिणोनिहन्मामित्यर्थः १७ तेसर्वंकाल

यदिगच्छसिमद्वाक्यमुल्लंघ्यनृपवाक्यतः तदाप्राणान्परित्यज्यगच्छामियमसादनं १३ लक्ष्मणेणापिततःकौशल्यावचनंरुषा उवाचराघवंवीक्ष्यदहत्विवजगत्त्रयं १४ उन्मत्तंभ्रांतमनसंकैकेयीवशवर्तिनं वध्वानिहन्मिभरतंतद्बंधून्मातुलानपि १५ अद्यपश्यंतुमेशौर्यंलोकान्प्रदहतःपुरा रामत्वमभिषेकायकुरुयत्नमरिंदम १६ धनुःपाणिरहंतत्रनिहन्म्यविघ्नकारिणः इतिब्रुवंतंसौमित्रिमालिंग्यरघुनंदनः १७ शूरोसिरघुशार्दूलममात्यंहितेरतः जानामिसर्वंतेसत्यंकिंतुतेसमयोनहि १८ यदिदंदृश्यतेसर्वंराज्यंदेहादिकंचयत् यदिसत्यंभवेत्तत्रआयासःसफलस्भवेत् १९ भोगामेघवितानस्थाविद्युल्लेखेवचंचलाः आयुरप्यग्निसंतप्तलोहस्थजलबिंदुवत् २० ६

तेसर्वंकालाग्निरुद्रतुल्यत्वंत्वद्रूपत्वंचसत्यमेवजानामिकिंतुतस्यपराक्रमस्यसमयइदानींनकिंचतुर्दशवर्षेइतियुग्मं १८ अथतत्रसजनप्रतारणायसंसारानित्यत्वप्रदर्शनेनरोषान्निवर्तयतियदिदमितिसर्वंजगद्राज्यंअततःस्वदेहादिकिंचनसत्यंतथाचकिंकस्यार्थेउपाहेयंयेनैवंरोषःकार्यइतिभावः यदिसत्यंभवेत्तदातेआयासःसफलोभवेदित्यन्वयः १८ मेघवितानंमेघसमूहः एवंचभोग्यभोक्त्रोरुभयोरप्यस्थिरत्वात्सर्वंमर्थमिभावः २० श्री रा म

यच्चेति यथासर्पेण गलस्थितेपि वृक्षफलादर्शिचेतनाभावोस्य सभोगाभासत्वमपि विस्मितमस्तु मजानत तद्गलस्थं सर्वं ज्ञानपेक्षतेदृष्टु तितथा कालाहिग्रस्तोलोकोभोगानिति छत्रीर्धः २१ कर्मतंत्रं धनार्जनादिव्यापारं काम्यवैदिककर्मचनन्वत्रकस्यभोगः शरीरस्यउतात्मनःनाद्यइत्याह देहस्त्विति घाङ्गर्वतस्यासंतजउत्वात्सुवादिसाक्षात्काररूपभोगस्यतत्रासंभवइतिभावः नोस

यथामालगलस्थोपिभेकोदंशांनपेक्षते तथाकालाहिनाग्रस्तोलोकोभोगानशाश्वतान् २१ करोतिदुःखेनहिकर्मतंत्रंशरीरभोगार्थमहर्निशंनरः देहस्तुभिन्नःपुरुषात्समीक्ष्यतेकोवात्र भोगःपुरुषेणभुज्यते २२ पितृमातृसुतभ्रातृदारबंध्वादिसंगमः प्रपायामिवजंतूनांनद्यांकाष्ठौघवच्चलः २३ छायेवलक्ष्मीश्चपलाप्रतीतातारुण्यमंबूर्मिवदध्रुवंच स्वप्नोपमंस्त्रीसुखमायुरल्पंतथापिजंतोरभिमानएषः २४ संसृतिःस्वप्नसदृशीसदारोगादिसंकुला।

इत्याहकोवात्रेतितस्यशुद्धस्वभावत्वेनापरिणामित्वात्तस्यभोसंभवइतिभावः अत्रदेहशब्देनचित्तमप्युपलक्ष्यते यद्यपितयोःपरस्परंविवेकाग्रहात् चित्तस्यभोगस्तथापिभ्रांतिमूलकइतियएवतितासर्थः २२ एवंभोगास्यायारमाधिकत्वमुक्तेदानींविरागपायपुत्रादिसंगस्यास्थिरमाह पित्रितिप्रपापानीयशालाकाष्ठौघवत् २३ प्रतीतानिश्चिता एष अभिमानःममधनादिअनेनचममचिरंभोगइत्यादिः २४ संसृतिःसंसारस्थितिःस्वप्नसदृशीअल्पकालाअनुवर्ततेतामुपा

कथंचिदिति कथमपीत्यर्थः नवुध्यते ममापि जरामृत्यू इति कथमपि नबुध्यते इत्यर्थः २६ पूर्वपूर्वभुक्तिदिनरात्रिप
क्षयोत्तरोत्तरस्य विशेषमपश्यन् अतो मूढमति कालवेगं पूर्वावस्थापहारकं न पश्यति अतो भोगाननुपतति ते तेषां स
ज्जते २७ आमघट आपक्वघटः सपत्नाः शत्रवः २८ आगतप्राया हं किं मूढोसीति तर्जयति मृत्युः समयं प्रहर्तुं सं

आयुष्यं क्षीयते यस्मात् दादित्यस्य गतागतैः दृष्ट्वान्येषां जरामृत्यू कथंचिन्नैव बुध्यते २६ स
एव दिवसः सैव रात्रिरिति मूढधीः भोगाननुपतत्येव कालवेगं न पश्यति २७ प्रतिक्ष
णं क्षरत्येव तद्रामघटांबुवत् सपत्ना इव रोगौघाः शरीरं सहो २८ जराव्याघ्रीव पुरत
स्तर्जयंत्यवतिष्टते मृत्युः सहैव यात्येषः समयं संप्रतीक्षते २९ देहेहंभावमापन्नो राजाहं
लोकविश्रुतः इत्यस्मिन्मनुते जंतुः कृमिविड्भस्मसंज्ञिते ३० त्वगस्थिमांसविण्मूत्ररेतो
रक्तादिसंयुतः विकारी परिणामी च देह आत्मा कथं वद ३१

प्रतीक्षमे सहतिष्टन्नपि २९ देहे उपचयादिविशिष्टे कृमिविड्भस्मसंज्ञिते भक्ष्ये आ द्यासंज्ञा जंतुभिर्भक्षिते मध्या
संज्ञा दग्धे अंत्यासा तादृशे देहे हं भावं प्राप्तोहं राजेति अस्मिन् लोके मनुते ३० अथ देहस्यात्मत्वं खंडयति त्वगादि
संयुतत्वाद्विकारी रसादिधातुविकारवान् परिणामी बाल्यादि अवस्थापरिणामवान् आत्मा त्वविकारी अपरिणामी
चेति विपरीतः अस्यादिभिरतः इति भावः ३१ श्री रा म

यंरागादिदोषसमूहंतेदोषादेहाभिमानिनःप्रादुर्भवंति तस्मात्तंत्यजेतिभावः ३२ देहाभिमानिनस्यरागादिदो
षप्रादुर्भावःकत्वंतत्कारणाविद्यारूपत्वात्तस्येत्याह देहोहमिति देहइत्युपलक्षणमंतःकरणादेरपितदाहचिदात्मेति ३३
संस्रतेःसंसारमूलस्यरागादिदोषस्यशात्रवइतिस्वजन्मविद्योछेदकत्वाद्विद्याभ्यासेकामादयःशात्रवंकुर्वंतीत्यर्थः ३४ प्रस

यमास्थापभवाल्लोकंदग्धुमिछतिलक्ष्मण देहाभिमानिनःसर्वेदोषाःप्रादुर्भवंतिहि ३२
देहोहमितियाबुद्धिरविद्यासाप्रकीर्तिता नाहंदेहश्चिदात्मेतिबुद्धिर्विद्येतिभण्यते ३३ अविद्या
संस्रतेर्हेतुर्विद्यातस्यानिवर्त्तिका तस्माद्यत्नःसदाकार्योविद्याभ्यासेमुमुक्षुभिः कामक्रोधा
दयस्तत्रशात्रवःशत्रुसूदनः ३४ तत्रापिक्रोधएवालंमोक्षविघ्नायसर्वदा येनाविष्टःपुमान्हं
तिपितृभ्रातसुहृत्सखीन् ३५ क्रोधमूलोमनस्तापःक्रोधःसंसारबंधनं धर्मक्षयकरःक्रो
क्रोधएषमहाशत्रुःतृष्णावैतरणीनदी संतोषोनंदनवनंशांतिरवहिकामधुक् ३७ धस्तस्मात्क्रो

३६ धंपरिसज

तोपयोगितयाक्रोधस्यैवमुक्तिविघातेप्राधान्यमहतत्रादिवधेनपातिसंप्राप्तानश्रवणाद्यधिकारीतिभावः ३५
मनस्तापस्तज्जनकहननाद्युपायान्वेषणमित्यर्थः ३६ महान्शत्रुःपरिणामस्यप्राणापहारित्वात्क्रोधएवयमःसा

क्षाद्दितिपावोतरंवैतरणीनदीउत्तरत्वात् विषयलाभेःक
थमप्यनपगमादितिभावः॥

नजातुकामः कामानामुपभोगेनशाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धत इत्युक्तेः नंदनवनमानंदजनकत्वा
त् ३७ एवं शांतिसेवने ३८ तेभ्यो विलक्षणमेवाह अविकारी निराकृतिः देहादिस्तु साकार इति भावः ३९ ता
वदिति अहंममेत्यभिमानसत्वादिति भावः भिन्नं बुद्ध्यादिभ्य इत्यर्थः ४० बुद्ध्यादिभ्यः ल्यब्लोपे पंचमी तदतिरिक्तो

तस्माच्छांतिं भजस्वाद्य शत्रुरेवं भवेन्नते देहेंद्रियमनःप्राणबुद्ध्यादिभ्यो विलक्षणः ३८ आ
त्मा शुद्धः स्वयंज्योतिरविकारी निराकृतिः यावद्देहेंद्रियप्राणैर्भिन्नत्वं नात्मनो विदुः ३९ ता
वत्संसारदुःखौघैः पीड्यंते मृत्युसंयुताः तस्मात्त्वं सर्वदा भिन्नमात्मानं हृदि भावय ४० बु
द्ध्यादिभ्यो बहिः सर्वमनुवर्तस्व माखिदः भुंजन्प्रारब्धमखिलं सुखं वा दुःखमेव वा ४१ प्रवा
हपतितः कार्यं कुर्वन्नपि न लिप्यते बाह्ये सर्वत्र कर्तृत्वमावहन्नपि राघव ४२ अंतः शुद्धस्व
भावस्त्वं लिप्यसे न च कर्मभिः एतन्मयोदितं कृत्स्नं हृदि भावय सर्वदा ४३ संसारदुःखै
रखिलैर्बाध्यसे न कदाचन त्वमप्येवं मयादिष्टं हृदि भावय नित्यदा ४४ ५

हमिति अंतर्जानन्नेव तान् आलं व्यवहारं सर्वलोकवदेवानुवर्तस्व कुरु परं तु तत्र माखिदः खेदं न कुरु ननु लोकवत्कार्यक
रणे तद्वत्त्वे दोषोऽप्यवश्यंभाव्येति सत्यमाह भुंजन्निति अखिलं सुखं दुःखं वा प्रारब्धामिसेव भुंजन् तथा भावयेत् ४१ प्र
वाहपतितोऽपि संसारप्रवाहस्थोऽपि कार्यं व्यवहारं कुर्वन्नपि तज्जन्यपापपुण्याभ्यां न लिप्यते पृथग्जनोऽपि एवं च तव तथा भाव

कार्यात्सर्वव्यापारहेतुरस्मदाद्यहर्ता ४२ नैवात्र
नर्हति ४३ ४४

समागमं मे पुनरागमं एकं भावयंती प्रतीक्षस्वेत्यर्थः ४५ यथा सरितां प्रवाहे पतितप्लवानां न सदैकत्र संवासः किंतु क्षणमात्रं तथा कर्ममार्गे संसारे वर्त्तमानानां पितृपुत्रादीनामपीत्यर्थः एवं भावनायां चतुर्दशसमानां संख्या दिवसगुणना क्षणार्द्धवत् अल्पकालेनैव समाप्ता भवतीत्यर्थः ४६ एवं च तत् त्वदनुमत्या गमनं चेत् तदा मम वने सुखजन

समागमं प्रतीक्षस्व न दुःखैर्वपीड्यसे चिरं न सदैकत्र संवासः कर्ममार्गानुवर्त्तिनां ४५ य
था प्रवाहपतितप्लवानां सरितां तथा चतुर्दशसमासंख्याः क्षणार्द्धमिव जायते ४६ अ
नुमन्य स्वमामं वदुःखं संसज्य दूरतः एवं चेत्सुखसंवासो भविष्यति वने मम ४७ इ
त्यादेः ड्वनू मातुः पादयोरपतच्चिरं उत्थाप्यांके समावेश्य पत्राशीभिरभिनंदयत् ४८ स
वैर्देवाः सगंधर्वाः ब्रह्मविष्णुशिवादयः रक्षंतु त्वां सदा यांतं तिष्ठंतं निद्रया युतं ४९ इति
प्रस्थापयामास समालिंग्य पुनः पुनः लक्ष्मणोपि तदा रामेण त्वाहषण्क्रिगद्गदः ५० आह
राम मम मां तस्थः संशयो यत्त्वया हृतः या सा मिपष्टतो राम सेवां कर्त्तुं तदा दिवाः ५१

कः संवासो भविष्यतीत्यर्थः ४७ चिरं यावदनुमतिपर्यंतं अभिनंदयत् अभ्यनंदयत् अडभाव आर्षः ४८ तदेवा
ह सर्वे इति संदेसस्यविवरणं यांतमित्यादि ४९ ५० रामेति पुनरुक्तिर्हर्षातिशयात् ५१ ५२ ५३

५२ एवं लक्ष्मणमुक्त्वा व्रतस्थेमा तृग्रहादिति शेषः ततः मतिप्रियां सीतां समाधातुं विभुर्जगतः पतिर्गतः स्वगृह
मिर्गतः स्वगृहमिति शेषः ५३ ५४ सेनया विना कुत्र गत आगतोसीत्यन्वयः कुतः कुतो हेतोर्नानदृश्यते इत्यर्थः वादित्रा
णि न वाद्यंते कुत इति शेषः एवमग्रेपि ५५ सामंतराजेति एकाकीमित्यागत इत्यर्थः पर्या योक्तमलंकारः ५६ ५७ अद्येव

अनुगृह्णीष्व मां राम नो चेत्प्राणांस्त्यजाम्यहं तथेति राघवोप्याह लक्ष्मणं याहि मा चिरं ५२
व्रतस्थेतां समाधातुं गतः सीतापतिर्विभुः आगतं पतिमालोक्य सीता सुस्मितभाषिणी ५३
स्वर्णपात्रस्थसलिलैः पादौ प्रक्षाल्य भक्तितः पप्रच्छ पतिमालोक्य देव किं सेनया विना ५४
आगतोसि गतः कुत्र श्वेतछत्रं च ते कुतः वादित्राणि न वाद्यंते किरीटादिविवर्जितः ५५ सामंत
राजसहितः संभ्रमागतोसि किं इति स्म सीतया पृष्टो रामः सस्मितमब्रवीत् ५६ राज्ञा मे
दंडकारण्यराज्यं दत्तं शुभे खिलं अतस्तत्पालनार्थाय शीघ्रं यास्यामि भामिनि ५७ अ
द्यैव यास्यामि वनं त्वं तु श्वश्रूसमीपगा शुश्रूषां कुरु मे मातुर्न मिथ्यावादिनो वयं ५८ इ
ति ब्रुवंतं श्रीरामं सीता भीताब्रवीद्वचः किमर्थं न च राज्यं ते पित्रा दत्तं महात्मना ५९ ता

यास्यामीति नो पहासोयमित्याह नमिथ्येति ५८ ५९ वरस्वरूपमाह भरतायेति ६० तया देव्या पावितो
मयि दयापरोपि राजा सत्यवादी अवन्नं पलडत्तं द्यास्यामीति प्रतिज्ञावाक्यस्य सत्यत्वकृतु मे वनवासं ददौ ६१

६२ नोचितंश्वशुरस्यतश्वश्रूस्यतवमयाविनाकार्याक्षमत्वात् विवाहकालेनातिचरिष्यामीतिप्रज्ञानत्वाच्च ६३ व
ननयनाभावेहेतुगर्भंविशेषणंवहुव्याघ्रेत्यादि ६४ ६५ ६६ फलादिकमपिसमयेदुर्लभमित्याहकालेइत्या

चतुर्दशसमास्तत्रवासोमेकिलयाचितः तयाद्यमाद्वैराजासत्यवादीदयापरः ६१ अ
तःशीघ्रंगमिष्यामिमाविघ्नंकुरुभामिनि श्रुत्वातद्रामवचनंजानकीप्रीतिसंयुता ६२ अ
हमग्रेगमिष्यामिवनंपश्चात्त्वमेष्यसि इत्याहमाविनागंतुंनवराघवनोचितं ६३ तामा
हराघवःप्रीतःस्वप्रियांप्रियवादिनी कथंवनंत्वांनेष्येहंवहुव्यालमृगाकुलं ६४ राक्ष
साघोररूपाश्चसंतिमानुषभोजिनः सिंहव्याघ्रवराहाश्चसंचरंतिसमंततः ६५ कटू
म्लफलमूलानिभोजनार्थंसुमध्यमे अपूपानिव्यंजनानिविद्यंतेनकदाचनः ६६ काले
कालेफलंवापिविद्यतेनचतत्रसुंदरिमार्गोनदृश्यतेक्वापिशर्कराकंटकान्वितः ६७ गुहागह्वर
संबाधंझिल्लीदंशादिभिर्युतं एवंबहुविधंदोषंवनंदंडकसंज्ञितं। ६८ पादचारेणगंतव्यंशी
तवातातपादिमत् राक्षसादीनतेदृष्ट्वाजीवितंहास्यसेचिरात् ६९ ६७ ६७ ६७

दिनदृश्यतेवनेषुतृणाद्याच्छादनात्जनसंचाराभावाच्च यत्रापिदृश्यतेतत्रापिशर्कराद्यन्वितः ६७ वासस्थानमप्यतिदुःख
जनकमित्याह गुहेत्यादिसम्यक्बाधंतरिपदोयतिसंबाधंदुर्गवासस्थानंगुहागह्वरसंतद्यद्यपितिदुपीडारहितंतथापिझिल्ली
दंशादियुतत्वात्तत्रस्थातुमशक्यमितिभावः ६८ तत्रापिपद्भ्यागमनमतिदुःखमित्याह पादेति ६९ श्री राम

७० स्फुरद्वक्त्रा अंतर्गतक्रोधवशात्तत्स्फुरणं तदेवाह किंचित्कोपेति असागेहेत्वे वो धर्मपत्नीत्वादयः ७१ पतिव्रतात्वमे
वोपपादयति त्वदनन्यामिति त्वत्तोन्यःपुरुषो न विद्यते यस्यास्तां यद्वा त्वत्तो भेदरहितां शान्तिशान्तिमतोरभेदात् अत
एवादोषां यापि रक्षोधर्षणाविभीषिका सापि मिथ्येत्याह त्वत्समीप इति यन्नामस्मरणे नरक्षांसि पलायते तत्स्पतेवस

मत्सुवान्वसुरवक्त्रा किंचित्कोपसमन्विता कथं मामिच्छसे त्यक्तुं धर्मपत्नीं पतिव्रतां ७१ त्व
दनन्यामदोषां मां धर्मज्ञोसि दयापर त्वत्समीपे स्थितां राम को वा मां धर्षयेद्वने ७२ फलमू
लादिकं यद्य तव भुक्तावशेषितं तदेवामृततुल्यं मे तेन तुष्टा रमाम्यहं ७३ त्वया सह चरंत्या
मे कुशाः काशाश्च कंटकाः पुष्पास्तरणतुल्यास्ते भविष्यंति न संशयः ७४ अहं त्वां क्लेशये
नैव भवेयं कार्यसाधिनी बाल्ये मां वीक्ष्य कश्चिद्धि ज्योतिःशास्त्रविशारदः ७५ ॰ ॰

र्थः ७२ यद्यपि फलादीनां कटुत्वाद्युक्तं तत्परिहरति तत भुक्तावशिष्टं विद्यमत्त्वादमृततुल्यमित्यर्थः रमामीत्यात्मनेपदमैप
दं ७३ चरंत्या गच्छंत्याः अत्र त्वत्संग एव हेतुरिति भावः ७४ कार्यसाधिनी रक्षोवधादिकार्यसाधिकेति व्यंग्यं वन
मनं चेमे वक्ष्यंभावीति इतिहासकल्पनेन दृष्ट्यपतिवाल्मीकि इति ७५ श्रीराम जयराम ॰ ॰

७६ ७७ त्वत्सहाधिनीत्यादिसर्वकार्येष्वहमेवतेसहायेतिमंगयं ७८ ७९ गछ्छगमनंकुरुतत्रवनेतपस्विवेषेणहारादीनांक्वचित्स्थापनमावश्यकंतत्रसर्वस्यलेघपायसंभावनात्तान्निरपायस्यानेब्राह्मणेषुदानमित्याह

प्राहतेविपिनेवासःपत्यासहभविष्यति सत्यवादीद्विजोभूयाद्गमिष्यामित्वयासह ७६ अन्यत्विचित्रवक्ष्यामिश्रृणुत्वामांनयकाननं रामायणानिवहुशःश्रुत्वानिवहुभिर्द्विजैः ७७ सीताविनावनंरामोगतःकिंकुत्रचिद्वद अतस्त्वयागमिष्यामिसर्वथात्वत्सहायिनी ७८ यदिगछ्छसिमांत्यक्त्वाप्राणांस्त्यक्ष्यामितेग्रतः इतितंनिनिश्चयंज्ञात्वासीतायारघुनंदनः ७९ अत्रवीद्देविगछ्छत्वंवनंशीघ्रंमयासह अरुंधत्यैप्रयछ्छाशुहारानाभरणानिच ८० ब्राह्मणेभ्योधनंसर्वंदत्वागछ्छामहेवनं इत्युक्त्वालक्ष्मणेनाशुद्विजानाहूयभक्तितः ८१ ददौगवांवृंदशतंधनानिचवस्त्राणिदिव्यानिविभूषणानि कुटुंववद्भ्यःश्रुतिशीलवद्भ्योमुदाद्विजे

अरुंधत्यैइति वसिष्टपत्न्यैयत्रस्थापितमेतद्दहापायेपिलभ्यमितिभावः ८० वयमपितथैवकुर्मइत्याह ब्राह्मणेभ्यइति ८१ श्रुतंवेदाध्ययनं कुटुंववत्वंइदंचदानपात्रतासंपादकंविशेषणं ८२ ७ श्रीराम ६

२०

मातृसेवकेभ्योदानेमातृस्नेहेन ८३ ८४ समर्पयत् ततस्यइत्सआहारःसमागतरामस्याग्रेस्थितइत्सन्वयः ८५ ततः रामइति ८६ नृपपथेराजमार्गेकुतूहलेनपश्यंपतितान्कुतूहलदृशःपौरान् सानंदंपश्यन् तेनतेषांउः

अरुंधत्यैददौसीतामुख्याभ्याभरणानिच रामोमातुःसेवकेभ्योददौधनमनेकधा ८३ । स्वकातःपुरवासिभ्यःसेवकेभ्यस्तथैवच पौराजानपदेभ्यश्चब्राह्मणेभ्यःसहस्रशः ८४ लक्ष्मणोपिसुमित्रातुकौशलायैसमर्पयत् धनुःपाणिःसमागत्यरामस्याग्रेव्यवस्थितः ८५ रामःसीतालक्ष्मणश्चजग्मुःसर्वेनृपालयं ८६ श्रीरामःसहसीतयानृपपथेगच्छन् शनैःसानुजःपौरानूजानपदानुकुतूहलदृशःसानंदमुद्वीक्षयन् श्यामःकामसहस्रसुंदरवपुःकांत्यादिशोभाशयन् पादन्यासपवित्रिताखिलजगत्प्रापालयंतत्पितुः ८७ इतिअयोध्याकांडेचतुर्थःसर्गः ४ आयांतंनागराद्दृष्टामार्गेरामंसजानकिं लक्ष्मणे

नृपसमविशालितुष्टमार्गैः ८

खनिरासःपितुस्ततकैकेय्याधिष्ठितंआलयंगृहंप्राप ८७ इतिश्रीअयोध्याकांडेचतुर्थःसर्गः ४ सजानकिंजानक्यासहितंलक्ष्मणेनसममायांतमित्यन्वयः तादृशंदृष्टा परस्परंवीक्ष्योचुपरमिसेव १ ५ श्री

ससंधंससप्रतिज्ञं २ असजत्वनवासमापिवृवान् ससवतासस्वर्णलोपश्चार्षः कैकेयीवापूर्वं अत्संतरा
मेप्रीतिमतीकथंदुष्टाजातेतिशेषः यस्त्ररतस्यराज्यंरामस्यवनवासंचव्रतवतीतिभावः ३ याचतांवालोभा
भरतस्यराज्यंरामुत्त्यमानगुणंकथंकुतोहेतोर्विवासयामासात्रहेतुंनपश्यामः अतोनिष्प्रयोजनदुश्चत्ववज्ञानवस

स

कैकेय्यावरदानादिक्षत्वादुःखसमन्विताः वतराजादशरथःससंघंप्रियंसुतं २ स्त्रीहे
तोरत्सजत्कामीतस्यसर्वज्ञताकुतः कैकेयीवाकथंदुष्टारामंसत्संप्रियंकरं ३ विवासयामास
कथंक्रूरकर्मातिमूढधीः हेजनानात्रवस्तव्यंगछमोघैवकाननं ४ यत्ररामःसभार्यश्च
सानुजोगंतुमिछति पश्यंतुजानकींसर्वेपादचारेणगछतीं ५ पुंभिःकदाचिद्दृष्टावाजा
नकीलोकसुंदरी सापिपादेनगछंतीजनैर्घनावृता ६ रामोपिपादचारेणगजाश्वा
दिविवर्जितःगछतिदृश्यपथविभुंसर्वलोकैकसुंदरं ७ रक्षसीकैकयीनाम्नीजातासर्वविना
विनाशिनी रामस्यापिभवेदुःखंसीतायाःपादयानतः ८

स्मिन्देशेनवस्तव्यमित्याहुःहेजनाइति ४ यत्रकाननेपश्यंत्विति पश्यंत्विति तेनसर्वथादेवश्रावल्भ्यंजानंतुइतियगंप ५
तस्त्वोपपास्यति पुंभिरिति गछंतीमस्यदृश्यतामितिशेषः ६ दृश्यपथअसाप्युक्तयंग्पेएवतासर्यं ७ राक्षसीति यद्धः

मीति पद्मसारामस्यास्वनसादिरुतदुःखाभावेपिसीता
याःपादगमनरूतंदुःखंतस्यापिभावेदिसन्वयः ८

उपसंहरइति वलवानितिपर्योक्तमलंकारःसाधूनांवृंदेसमूहे ९ तत्ततस्तेषांतत्त्ववच्मीसर्थः १० परोजडेभ्यःविष्णुर्व्याप
कःवैकुंठनिलयोवाआदित्यान्तरेजीवसमूहस्तद्रूपोहिरण्यगर्भस्तस्याप्यवनःपरायणःवेदलाभद्वारात्त्रय्यादिसामर्थ

वलवानविधिरेवात्रपुंसःपत्नोहिदुर्वलः इतिह्युरवाकुलेवृंदेसाधूनांमुनिपुंगवः ९ अब्रवीद्य
मदेवोथसाधूनांसंघमध्यगः मानुषोप्यचरामेवासीतांवावच्मितत्त्वतः १० एषरामःपरो
विष्णुरादिनारायणःस्मृतः एषसाजानकीलक्ष्मीर्योगमायेतिविश्रुत ११ अशेषशेषस्त
मन्वेतिलक्ष्मणाख्यःस्वसांप्रतं एषमायागुणैर्युक्तस्तत्तदाकारवानिव १२ एषएवरजो
युक्तोब्रह्माभूदिश्वभावनःसत्वाविष्टस्तथाविष्णुस्त्रिजगत्प्रतिपालकः १३ एषरुद्रस्तामस॰
सीतेजगत्प्रलयकारकःरसीऽघमत्स्यपुरामूर्तीभक्तिवैवस्वतंमनुं १४ नाव्यारोप्यलयस्यांतेपा
लयामासराघवः समुद्रमथनेपूर्वंमंदरेसुतलंगते १५ ॥ ॥ ॥

दः योगमायोगेनस्वसंबंधेनापरिछिन्नमपिपरिछिनत्तिसा ११ एषमायेति एतेनमायिकएवायमाकारोनतुपां
चभौतिकइत्युक्तं १२ मायागुणैस्तत्तदाकारवत्वमेवविवृणोतिएषएवेतिविश्वभावनोविश्वस्रष्टा १३ १४ लय
स्यांतेलयस्यदैनंदिनप्रलयस्यआंतसमाप्तिपर्यंत १५ श्रीरामः जयरामः ॥ ॥

अधारयत्त्वपृष्टेद्रिंकूर्मरूपीरघूतमः महीरसातलंयाताप्रलंपेस्तकरस्तदेत्यादिः ३६ ३७ तद्रक्षःप्रल्हादमीडवं
रक्षःपुत्रराज्यंइंद्रराज्यंहतंवलिना ३८ याम्चायावलेःसकाशाद्रिक्षाआजेनाहरत्पराववर्तितवान् ३९ २० तस

हा

अधारयत्त्वपृष्टेद्रिंकूर्मरूपीरघूतमः महीरसातलंयाताप्रलंपेस्तकरोभवत् ३६ तोलया
मासदंष्ट्राग्रेतांक्षोणीं रघुनंदनः नारसिंहंवपुःकृत्वाप्रल्हादवरदःपुरा ३७ त्रिलोककंटकंर
क्षःपाटयामासतन्नरवैः पुत्रराज्यंहतंदृष्ट्वाह्यदितेयाचितःपुरा ३८ वामनत्त्वमुपागम्य
याञ्चयाचाहरत्सुनः दुष्टक्षत्रियभूभारनिवृत्त्यैभार्गवोभवत् ३९ सएवजगतांनाथइदा
नींरामत्तांगतःरावणादीनिरक्षांसिकोटिशोनिहतिष्यति २० मानुंषेनैवमरणंतस्यदृष्टं
दुरात्मनः राज्ञादशरथेनापितपसाराधितोहरिः २१ पुत्रत्वाकांक्षयाविष्णोस्तस्यपुत्रोभ
वद्धरिः सएवविष्णुःश्रीरामोरावणादिवधायहि २२ गंतात्वेवनेरामोलक्ष्मणेनसहायवा

व

रावणस्यनन्वेवंदशरथगृहेएवावतारलेकिंवीजंतत्राहराज्ञेति २१ पुत्रत्वाकांक्षयाविष्णोरिति विष्णुर्मेपुत्रोभव
तितीच्छेयेत्यर्थः २२ २३ नारदःप्राहभरहरणोद्देशपकंब्रह्मणःसंदेशावचइत्यर्थः २४ २५ रामोदुःखितोभवि

ष्यतीत्यपिवक्ष्याशंकैवसाह रामेतिमृत्युभयाभावेइतरभयाभावः कैमुत्तिकन्यायसिद्धः तन्नामजपकर्तुस्तत्वज्ञानो
दयादितिभावः २६ तस्यदुःखशंकाकेत्यन्वयः कलौतुनाम्नैवनामाभिलापेनैवमुक्तिस्तज्जनकंतत्वज्ञानंनान्येनयो

राजावाकैकेयीवापिनात्रकारणमरण्वपि पूर्वंघनविदःप्राहभूभारहरणायच २४ रामो
प्याहस्वयंसाक्षात्भ्वागमिथ्यामहंवनं अतोरामंसमुद्दिश्यचिंतासजथवाल्पिजा २५
रामरामेतियेनित्यंजपंतिमनुजाभुवितेषांमृत्युभयादीनिनभवंतिकदाचन् २६ कापुनस्त
स्यरामस्यदुःखशंकामहात्मनः रामनाम्नैवमुक्तिःस्यात्कलौनान्येनकेनचित् २७ माया
मानुषवेषेणविडंबयतिलोककृत् भक्तानांभजनार्थायरावणस्यवधायच २८ राज्ञश्चा
भीष्टसिध्यर्थैमानुषंवपुराश्रितः इत्युक्त्वाविरराशाथवामदेवोमहामुनिः २९ ६ श्रीराम

मा

गादिनेसर्धः २७ इदन्नास्य किमर्थेदेहपरिग्रहः तत्राहमायेत्यादि विसादि विडंयति स्वीयाचारेणसदाचा
रंलोकान्शिक्षयतिमातापितरौपुत्रानिवफलांतरमप्याह भक्तानामिति २८ राजाभीष्टंदिहमोऽस्त्वपुत्रत्वं
२९

हृत्संशयग्रंथिंहृदिविद्यमानंरामेमनुष्यत्वादिविषयंब्रह्मादिविषयंसंशयग्रंथिं ३० ३१ गोपनीयंपृथग्जने
ष्विितिशेषः ३२ अवारितःपुत्रत्वात्द्वारपालैरितिशेषः गत्वाकैकेयीसमीपमितिशेषः ३३ तेसंमतंवनंदंडकारण्यं
गंतुंकृतधियोनिश्चिताइत्यन्वयः आज्ञापयतुपितस्तेनेनतदाज्ञांविनागमनेतस्यदुःखादोअहंदोषभाक्स्यामि

कृत्वातेपिद्विजाःसर्वेरामंज्ञात्वाहरिंविभुं जहुर्हृत्संशयंग्रंथिंराममेवान्वचिंतयन् ३० य
इदंचिंतयेन्नित्यंरहस्यंरामसीतयोः तस्यरामेदृढाभक्तिर्भवेद्विज्ञानपूर्वकं ३१ रहस्यंगो
पनीयंवोपूर्यवैराघवप्रियाः इत्युक्त्वाप्रययौविप्रस्तेपिरामंपरंविदुः ३२ ततोरामाविश्य
पितृगेहमवारितःसानुजःसीतयागत्वाकैकेयीमिदमब्रवीत् ३३ आगतास्मोवयंमा
तस्त्रयस्तेसंमतंवनं गंतुंकृतधियःशीघ्रमाज्ञापयतुनःपिता ३४ इत्युक्त्वासहसोत्थाय
चीराणिप्रददौस्वयं रामायलक्ष्मणायाथासीतायैचपृथक्पृथक् ३५ रामस्तुवस्त्राण्यु
त्सृज्यवन्यचीराणिपर्यधात् लक्ष्मणोपितथाचक्रेसीतातन्नविजानती ३६ ७ ७

तिस्त्रचितं ३४ इत्युक्तारामेणकैकेयीसहसाउटतिउत्थायरामायेत्यन्वयः चीराणिवन्यपरिधेयानिदीनिजीर्णवासां

हस्तेगृहीत्वाचीरमितिशेषः तच्चीरंकैकेयीदत्तंचीरं ३७ भर्त्सयन्कैकेयीमितिशेषः ३८ किंत्र्यपच्छसिचीरमितिशेषः ३९ यदीति त्वद्दृराविषयभर्तासियदिस्वेच्छयासमन्वेतिसम्यक्ग्लानिरहितमनुपश्चाद्गच्छतीत्यर्थः ४० वनदुः

हस्तेगृहीत्वारामस्यलज्जयामुखमैक्षत रामोगृहीत्वातच्चीरमंशुकेपर्यवेष्टयत् ३७ तद्दृष्ट्वारुरुदुःसर्वेराजदाराःसमंततः वसिष्ठस्तुसमाकर्ण्यरुदितंभर्त्सयन्रुषा कैकेयींप्राहदुर्वृत्तेरामएवत्वयावृतः वनवासायदुष्टेत्वंसीतायैकिंत्र्यपच्छसि ३९ यदिरामंसमन्वेतिसीताभक्त्यापतिव्रता दिव्यांवरधरानित्यंसर्वाभरणभूषिता ४० रमयत्वनिशंरामंवनदुःखनिवारिणी राजादशरथोप्याहसुमंत्ररथमानय ४१ रथमारुह्यगच्छंतुवनंवनचरप्रियाः इत्युक्त्वाराममालोक्यसीतांचैवसलक्ष्मणं ४२ दुःखान्निपतितोभूमौरुरोदाश्रुपरिप्लुतः आरुरोहरथंसीताशीघ्रंरामस्यपश्यतः ४३ रामःप्रदक्षिणंकृत्वापितरंरथमारुहत् लक्ष्मणःखड्गयुगलंधनुस्तूणीयुगंतथा ४४ गृहीत्वारथमारुह्यनोदयामाससारथिं तिष्ठतिष्ठसुमंत्रेतिराजादशरथोऽब्रवीत् ४५ गच्छगच्छेतिरामेणनोदितोचोदयद्रथं रामः

खंवनवासजदुःखं ४१ वनचरामुनयःप्रियायेषांते ४२ सीताशीघ्रमारुरोहेत्यनेनतस्याःकार्यसाधकउत्साहःसूचितः ४३ ४५ रथमनोदयत्राज्ञामाधीनतत्वात्प्रजाज्ञापेक्षयातदाज्ञयैववलेतिमत्वेतियंग्यंदूरंगतेदृष्टिपथम्

रामः

वृद्धा इत्यस्य ज्ञानवृद्धा इत्यर्थ ४७ राममातुरित्यादरसूचकं विशेषणं ४८ दुःखितस्य मे यदि किंचित्कालं जीवनं भवेत्तदा तत्र राममातृगेहे एवास्मत्तु क्षणमात्रमपि तत्र संभाव्यते राममातृगेहेपि चिरं नैवेत्यादिसाह अतइति निरार

पौराश्च बालवृद्धाश्च वृद्धाब्राह्मणसत्तमाः तिष्ठतिष्ठेतिरामेति क्रोशंतोरथमन्वयुः ४७ राजार दित्वासुचिरमानपतुगृहंप्रति कैशल्यायाराममातुरित्याहपरिचारकान् ४८ किंचित्का लंभवेतत्रजीवनंदुःखितस्यमे अतउर्द्ध्वंनजीवामिचिरंरामंविनाहतः ४९ ततोगृहंप्र विश्यैवकैशल्यायाःपपातह मूर्छितश्चचिरादुध्वात्तूष्णीमेवावतस्थिवान् ५० रामस्तु तमसातीरंगत्वातत्रावसत्सुखी जलंप्राश्यनिराहारोवृक्षमूलेस्वपद्विभुः ५१ सीतयासहधे र्मात्माधनुःपाणिस्तुलक्ष्मणः पालयामासधर्मज्ञःसुमंत्रेणसमन्वितः ५२ पौराःसर्वेस मागत्यस्थितास्तस्याविदूरतः शक्तारामंपुरंनेतुंनोचेद्गच्छामहेवनं ५३ इतिनिश्चयमाज्ञा यतेपौरामोतिविस्मितः नाहंगच्छामिनगरमेतेवैक्लेशभागिनः ५४

मा

तःदैवेनेतिशेषः अनेनदैवसंपादितंमरणंवरमितिध्वनितं ४९ तूष्णीमेवस्वस्वतापराधेनलज्जयेतिभावः ५० ५१ सीतयासहास्वपदित्यन्वयः पालयामासजाग्रतरामंररक्षेत्यर्थः ५२ ५३ रामंपुरंनेतुंपदिष्टाज्ञास्त

त्स्परावस नेष्यामो वेह्ननेमेवगमिष्याम इति निश्चियमि सर्थः ५४

२४ क्लेशभागिनोवनगमनादितिभावः ५५ ५६ अयोध्याभिमुखमिति तेषांप्रतारणायेदं ५७ तदेवाहरथनेमी
ति ५८ ५९ शृंगिवेरंशृंगिस्तष्याश्रमस्तदविदूरतस्तत्पूर्वभागे ६० जनैःजनमुखैः ६१ अयंसखासमान॰

टि

भविष्यन्तीतिमिश्रित्यसुमंत्रमिदमब्रवीत् तदानीमिवराघवोमंःसुमंत्रंप्रमोनय ५५ इत्याज्ञप्तःसुमंत्रोपिर
थंवाहेरथोजयत आरुह्यरामःसीताचलक्ष्मणोपिययुद्रुतं ५६ अयोध्याभिमुखंगत्वाकिंचिद्दूरंत
तोययुः तेपिराममदृष्ट्वैवव्रातस्त्थायदुःखिताः ५७ रथनेमिगतंमार्गपश्यंतस्तेपुरंययुः हृदिरा
मससीतंतेध्यायंतस्तस्थुरन्वहं ५८ सुमंत्रोपिरथंशीघ्रंनोदयामाससादरं स्फीतान्जनपदान्
पश्यन्रामःसीतासमन्वितः ५९ गंगातीरंसमागच्छछृंगवेराविदूरतः गंगांदृष्ट्वानमस्कृत्यस्नात्वा
सानंदमानसः ६० शिंशपावृक्षमूलेषुनिषसादरघूत्तमः ततोगुहोजनैःश्रुत्वारामागममहोत्सवं
सखायंस्वामिनंद्रष्टुंहर्षात्तूर्णंसमापतत् फलानिमधुपुष्पादिगृहीत्वाभक्तिसंयुतः ६२ रामस्या
ग्रेविनिःक्षिप्यदंडवत्प्रणतिंभुवि गुहमुत्थाप्यतंतूर्णंराघवःपरिषस्वजे ६३

राम॰

१

ख्यातिस्तत्समानज्ञानःअनेनगुहस्यधर्मव्याधादिवत्तत्त्वंसूचितंअथापिसत्सपिभेदापगमेनाथतवाहंनमामकीन
स्त्वमितिन्यायात्स्वामिनंद्रष्टुमिति ६२ ६३

नैषादमपि मे जन्म धन्यं त्वदंगस्पर्शादिति भावः ६४ तदेवाह भवेति एतत्ते किंकरस्य नैषादराज्यं ६५ यस्त्वदधी नमतोत्र वसन् अस्मान् पालय अत्र न ते पितुः स्वामित्वमिस त्रवासे दोषाभाव इति भावः ६६ दास इत्यनेनैव मोक्ष्यहार

संपृष्टकुशलो रामं गुहः प्रांजलिरब्रवीत् धन्योहमद्य मे जन्म नैषादं लोकपावनं ६४ बभूव परमानंदः स्पृष्ट्वा ते गं रघूत्तम नैषादराज्यमेतत्ते किंकरस्य रघूत्तम ६५ त्वदधीनं वसन्नत्र पालयास्मान् रघूद्वह आगच्छ या मो नगरं पावनं कुरु मे गृहं ६६ गृहाण फलमूलानि त्वदर्थं संचितानि मे अनुगृह्णीष्व भगवन् दासस्तेहं सुरोत्तम ६७ रामस्तमाह सुप्रीतो वचनं शृणु मे सखे न वेक्ष्यामि गृहं ग्रामं वर्षाणि नव पंच च ६८ दत्तमन्येन नो भुंजे फलमूलादि किंचन राज्यमेतत्ते सर्वं त्वं सखा मे अतिवल्लभः ६९ वटक्षीरं समानाय्य जटामुकुटमादरात् बबंध लक्ष्मणेनाथ सहितो रघुनंदनः ७० जलमात्रं तु संप्राश्य सीतया सह राघवः आस्तृतं तं कुशपर्णाद्यैः शयनं ल

तास्संचिता ६७ न वेक्ष्यामि न प्रवेक्ष्यामि इति मे प्रतिज्ञेति शेषः ६८ एतत्ते सर्वं राज्यं ममैव त्वं च मे सखैव तत् त्वज्ञात तत् तथापि प्रतिज्ञारक्षणाय त्वत्ते ग्रामं न प्रविशामीति भावः ६९ समानाय्य गुहेनेति शेषः अथ आनयनानंत रं वा तन्निं तरं वा ७० हि पारपूरणे लक्ष्मणेन यदास्तृतं ७१

तत्रोवासेसम्नयमुस्थितइत्सर्थः ततोनिद्रासमयेपसुष्वापेसर्थः ७१ परितोविपश्यन्नूड्नुस्थनृतीति तिशेषः ७३ अयोध्याकांडपं
चमःसर्गः ५ सुप्तमिति १ कुशापत्रसमूहनिर्मितेसंस्तरेआस्तरणेइत्यर्थः शामनैरांकवादिभिरास्तीर्णे २ ३ को
हेतुःअन्योनकोपीसर्थः ४ कस्तर्हिहेतुस्तत्राहस्वपूर्वेति ५ तदेवोपपादयतिस्वयमपितस्यनसंपादकइत्याहअहमि

उवासतत्रनगरेप्रासादाग्रेयथापुरासुष्वापतत्रवैदेह्यापर्यंकइवसंस्तृते ७२ ततोविदूरेपरिगृह्यचापंस
वाणतूणीरधनुःसलक्ष्मणःररक्षरामंपरितोविपश्यनगुहेनसार्द्धंसशरासनेन ७३ इतिश्रीअयोध्या
कांडेपंचमःसर्गः ५ सुप्तंराममसमालोक्यगुहःसाश्रुपरिप्लुतःलक्ष्मणंप्राहवितायास्रातःपश्यसिराघ
वं १ शयानंकुशपत्रौघसंस्तरेसीतयासह यः शेतेस्वर्णपर्यंकेस्वास्तीर्णेभवनोत्तमे २ कैकेयीराम
मदुःखस्यकारणंविधिनाकृता मंथराबुद्धिमास्थायकैकेयीपापमाचरत ३ तच्छ्रुत्वालक्ष्मणःप्राहस
खेशृणुवचोमम कःकस्यहेतुर्दुःखस्यकश्चहेतुःसुखस्यवा ४ स्वपूर्वार्जितकर्मैवकारणंसुखदुःखयो
५ सुखस्यदुःखस्यनकोपिदातापरोददातीतिकुबुद्धिरेषा अहंकरोमीतिवृथाभिमानःस्वकर्मसूत्रग्र
थितोहिलोकः ६ सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थवांधवाः स्वयमेवाचरत्कर्मतथात्रविभाव्यते ७

ति अहंसुखादिजनकक्रियांकरोमीसपिवृथाभिमानःअस्वातंत्र्यादितिभावःतदेवाह स्वकर्मसूत्रेणग्रथितईश्वरेणेतिशेष
यथासूत्रयुक्तकाष्ठपुत्तलीसूत्रधारेणनानाप्रकारसूत्रचालनेनानेकविधाक्रियावतीकरोतिएवंभगवान्कर्मरूपसूत्रचालनेनतथा
कारयतीतिभावः ६ सुहृन्मित्रंसोपाधिनिरुपाधिभेदाश्लिष्टेएवमरिद्वेष्याएतेकर्मसुहृत्वादिप्रयोजकंकर्मस्वयमेवाचरन्यनसुहृ

राम·

१

स्वकर्मवशगो नरः यद्यत्सुखं दुःखं वा यथागतं यथाप्राप्तं भवति तत्तद्भुक्त्वा स्वस्थमनाः रागद्वेषहीनो भवेत् ८ भोगाग
मे सुखभोगप्राप्तौ भोगविवर्जने दुःखभोगप्राप्तौ वांछामेवाभिनयति आगच्छत्विति सुखमिति शेषः मागच्छतु दुःखमिति
शेषः अत एवाहं भोगवशगो न भवेयम् इति निषेधार्थमव्ययं पृथक् पदं यथैवाहं तथैव रामोपीति न किंचिदस्माकमेतत्कृतं

सुखं वा यदि वा दुःखं स्वकर्मवशगो नरः यद्यद्यथागतं तत्तद्भुक्त्वा स्वस्थमना भवेत् ८ न मे भोगागमे वां
छा न मे भोगविवर्जने आगच्छतु यथमागच्छतु भोगवशगो भवेत् ९ यस्मिन्देशे च काले च यस्माद्वा येन
केन वा कृतं शुभाशुभं कर्म भोज्यं तत्तत्र नान्यथा १० अलं हर्षविषादाभ्यां शुभाशुभफलोदये विधा
त्रा विहितं यद्यत्तदलंघ्यं सुरासुरैः ११ सर्वदा सुखदुःखाभ्यां नरः प्रत्यवरुध्यते शरीरं पुण्यपापाभ्यामु
त्पन्नं सुखदुःखवत् १२ सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं द्वयमेतद्धि जंतूनामलंघ्यं दिनरात्रि

दुःखमिति भावः ९ यस्मादिति प्राप्य फलमिति शेषः तत्तत्र सुपलक्षणं तस्मात्तेनेत्सबोध्यं १० यद्यत् विधात्रावि
हितं तदलंघ्यमिति निश्चित्य सततं तत्फलोदये हर्षविषादाभ्यामलं एवं चास्मत्कृते त्वया विषादो न कार्य इति भावः ११ अवश्यक
र्त्वशरीरिणां तत्संबंध इत्याह सर्वदेति पुण्यपापजत्वात् शरीरस्य तदवच्छेदेन सुखदुःखवत्तावश्यकत्वाद्यं नरः सदा ताभ्यां प्रत्यव
रुध्यते संबध्यते १२ संबंधप्रकारमाह सुखस्यानंतरमिति एवं च पुनः सुखमपि भाव्येवेति भावः १३ ५ ५

इदानींपदार्थमात्रस्यत्रिगुणात्मकत्वेनसुखस्यापिदुःखात्मकत्वाद्धेयत्वमित्याह सुखमध्यइतितेनोभयमपिहेयमेवे तिनद्व्युक्तंपतंजलिनासर्वमेवदुःखंविवेकिनइति १४ उपसंहरतितस्मादितिदृष्टप्राप्तौनहृष्यंतिअनिष्टप्राप्तौन

सुखमध्येस्थितंदुःखंदुःखमध्येस्थितंसुखं द्वयमन्योन्यसंयुक्तंप्रोच्यतेजलपंकवत् १४ तस्माद्धैर्येणविद्वांसइष्टानिष्टोपपत्तिषु नहृष्यंतिनमुह्यंतिसर्वंमायेतिभावनात् १५ गुहलक्ष्मणयोरेवंभाषतोर्विमलंनभः बभूवरामःसलिलंस्पृष्ट्वाप्रातःसमाहितः १६ उवाचेशीघ्रंसुदृढांनावमानयमेसखे आरुह्यपरपारेवैगमिष्यामिप्रभुमाचिरं श्रुत्वारामस्यवचनंनिषादाधिपतिर्गुहः १७ स्वयमेवसुदृढांनावमानिनायसुभलक्षणां स्वामिन्नारुह्यतांनौकासीतयालक्ष्मणेनच १८ वाहयेज्ञातिभिःसार्द्धमहमेवसमाहितः तथेतिराघवःसीतामारोप्यशुभलक्षणां १९ गुहस्यहस्तावालंब्यस्वयंचारुहदच्युत आयुधादीन्समारोप्यलक्ष्मणोप्यारुरोहच २० गुहस्तुवाहयामासज्ञातिभिःसहितःस्वयं गंगामध्येगतागंगांप्रार्थयामासजानकी २१ देविगंगेनमस्तुभ्यंनिवृत्तापुनवासनः रामेणसहिताहंत्वांलक्ष्मणेनचपूजये २२ सुरामांसोपहारैश्चनानाबलिभिरादृता इत्युक्त्वापरकूलंतीर्त्वा

मुह्यंतीत्यन्वयःतत्रहेतुःसर्वमायेतिभावनात् नह्येवंइन्द्रजालिकभापावृतेष्टानिष्टप्राप्तौहर्षमोहौतइदितिभावः १५ सलिलंस्पृष्ट्वेतिप्रातःकालिकसकलक्रियोपलक्षणं १६ मेअवतरणायेतिशेषः १७ नौकारुह्यतामित्यन्वयः १८ वाहयेतिनौकामितिशेषः १९ २० वाहयामासअरित्रादिभिश्चालयामासपरपारंप्रापयितुमित्यर्थः गंगामध्येगताजानकीगंगांप्रार्थयामासेत्यन्वयः २१ २२

१ २

ॐ तत्त्वार्थी ...

श्रीरामगीतामितिक्रमेणैनसहस्रमिलिता २३ श्रीराम॰

आनुज्ञांस्वसहगमनविषयां २४ नैषादिर्गुहः २५ नासतंअपितुससमेवेसर्थः तेनान्यथानसंभावनीयमितिभावः २६ त्व
छ्रात्रस्छमत्रातिदुःखंगंगापरकूलेमेध्यंमृगंभक्ष्यंमृगंहुत्वावैम्वदेदवदेवताभ्यः २७ २८ वहिराश्रमद्वारि २९ ३० ३१ ३२

गुहोपिरोधवंभ्रातरममिथ्यामिलयासह अनुज्ञांदेहिराजेंद्रनोचेत्प्राणांस्त्यजाम्यहं २४ श्रुत्वानैष्यादिवचनंश्री
रामस्तमथाब्रवीत् गुहत्वपात्रस्थातव्यंममार्गावलोककः चतुर्दशसमाःस्थित्वादंडकेपुनरप्यहं २५ आया
स्यामुदितंसत्यंनासत्यंरामभाषितंभक्तंसमाश्वास्यपुनःपुनः २६ निवर्त्तयामासगुहंसोपिरुद्ध्राययथौगृहं त
त्रमेध्यंमृगंहत्वापक्वंहुत्वाचतेत्रयः २७ भुक्त्वावृक्षतलेसुप्तासुखमासततांनिशां ततोरामस्तुवैदेह्यालक्ष्मणे
नसमन्वितः २८ भरद्वाजाश्रमपदंगत्वावहिरुपस्थितः तत्रैकंवटुकंदृष्ट्वारामःप्राहचेहवटो २९ रामोदाशरथिःसी
तालक्ष्मणाभ्यांसमन्वितः आस्तेवहिर्वनस्येतिनिवेद्यतांमुनिसन्निधौ ३० तच्छ्रुत्वासत्वसागत्वापादयोःपतितोमुनेः
समागत्यवनाद्बहिरवस्थितः ३१ सभार्यःसानुजःश्रीमानाहमांदेवसन्निभः भरद्वाजायमुनयेज्ञापयस्वयथो
चितं ३२ तच्छ्रुत्वासहसोत्थायभरद्वाजोमुनीश्वरः गृहीत्वार्घ्यंचपाद्यंचरामसामीप्यमापयौ ३३ दृष्ट्वारामंयथा
न्यायंपूजयित्वासलक्ष्मणं आहमेपर्णशालांभोरामराजीवलोचन ३४ आगच्छपादरजसापुनीहिरघुनंदन इत्युक्तो

राममसामीप्यंस्वार्थेष्यञ्रामसमीपमित्यर्थः ३३ मेपर्णशालामागच्छेत्सन्वयः ३४ आनीयप्रापय्य ३५ श्रीराम ९६ ९६

२७

तपसः पारं पूर्णतां गतोस्मि प्राप्तोस्मि प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् तद्विष्णोः स्मरणादेव संपूर्णं स्यादिति श्रुतिरिति स्मृतेः यस्य नाम स्मरणेनापि सर्वकर्म पूर्णता तस्य साक्षाद्दर्शने किं वक्तव्यमित्यर्थः यद्वा तपसः पारं फलं सर्वतपःफलमेतत् यत्तव दर्शनमित्यर्थः ३६ भूतं भावि च तवोदन्तं वृत्तान्तो ज्ञातः तत्र भूतवृत्तान्तज्ञानमाह नपतिजानामीत्यादि ३७ यदर्थमिति सर्वत्रय

भरद्वाजः पुनः पूजयित्वा चकारातिथ्यमुत्तमं अद्याहं तपसः पारं गतोस्मि तव संगमात् ३६ यदर्थमवतीर्णोसि प्रार्थितो ब्रह्मणा पुरा यदर्थं वनवासस्ते यत्करिष्यसि वै पुनः ३८ जानामि ज्ञानदृष्ट्याहं जातया त्वदुपासनात् इतः परं त्वां किं वक्ष्ये कृतार्थोहं रघूत्तम ३९ यत्वां पश्यामि काकुत्स्थ पुरुषं प्रकृतेः परं रामस्तमभिवाद्याह सीतालक्ष्मणसंयुतः ४० अनुग्राह्यास्त्वया ब्रह्मन्वयं क्षत्रियबंधवः इति संभाष्य तेन्योन्यमुषित्वा मुनिसन्निधौ ४१ प्रातरुत्थाय यमुनामुत्तीर्य मुनिदारकैः कृतप्लवेन मुनिना दृष्टमार्गेण राघवः ४२ प्रययौ चित्रकूटाद्रिं वाल्मीकेर्यत्र चाश्रमः गत्वा रामोथ वाल्मीकेराश्रमं ऋषिसंकुलं ४३ नानामृगद्विजाकीर्णं नित्यं पुष्पफलाकुलं तत्र दृष्ट्वा समासीनं वाल्मीकिं मुनिसत्तमं ४४ छ श्रीराम

यदर्थं रक्षोवधार्थं ३८ ३९ प्रकृतेः परं प्रकृतिगुणास्पृष्टमीश्वरं ४० ते सीतारामलक्ष्मणभरद्वाजाः अन्योन्यं प्रायुक्तं संभाष्य ततो रामो मुनिसन्निधावुषित्वा ४१ यमुनायां कृतः प्लवो नवकं तस्मिन्नेन मुनिना दृष्टमार्गेण दर्शितमार्गेण राघवो मार्गदर्शकैर्मुनिदारकैः सह यमुनामुत्तीर्य ४२ चित्रकूटाद्रिं प्रययौ यत्र वाल्मीकेराश्रमः ऋसनेन जस्य प्राशास्तं ४३ द्विजाः पक्षिणो ब्राह्मणाश्च ४४

रमानाथंविस्मितारं ४५ कमनीयपद्मसदृशनेत्रं ४६ विस्मयेनानिमिषेंद्रीक्षणेनेत्रेयस्यसः हर्षजाश्रुभिःपूर्णेलोचनेयस्यसः
सःक्रमेणेवंभावः ४७ लालितःइदंमधुरमिदंमधुरमिदंमधुरमिदंभुंक्ष्वेतिएवंश्रीसावोधितः ४८ ४९ यदिजानंतीससंदिग्ध

ननामशिरसारामोलक्ष्मणेनचसीतया दृष्ट्वारामंरमानाथंवाल्मीकिर्लोकसुंदरं ४५ जानकीलक्ष्म
णोपेतंजटामुकुटमंडितं कंदर्पसदृशाकारंकमनीयांबुजेक्षणं ४६ दृष्ट्वैवसहसोत्तस्थौविस्मयानि
मिषेक्षणः आलिंग्यपरमानंदंरामंहर्षाश्रुलोचनः ४७ पूजयित्वाजगत्पूज्यंभक्त्यार्घ्यादिभिराहतः
फलमूलैःसुमधुरैर्भोजयित्वाचलालितः ४८ राघवःप्रांजलिःप्राहवाल्मीकिंविनयान्वितः पितुराज्ञां
पुरस्कृत्यदंडकानागतावयं ४९ भवंतोयदिजानंतिकिंवक्ष्यामोत्रकारणं यत्रमेसुखवासायभवेत्स्था
नंवदस्वतत् ५० सीतयासहितःकालंकिंचित्तत्रनयाम्यहं इत्युक्तोराघवेणासौमुनिःसस्मितमब्रवीत् ५१
त्वमेवसर्वलोकानांनिवासस्थानमुत्तमं तवापिसर्वभूतानिनिवाससदनानिहि ५२ श्रीराम

संदिग्धवचनंवेदाध्ययनमानंसुतितिवत्सर्वथाजानंत्येवातोत्रकारणकथनंविफलमितिभावः ५० तत्रयतंवदिष्यसितत्रेस
र्थःत्वमेवेतिलब्दिवर्तत्वाज्जगतइतिभावः तवापीति अंतर्यामितयासर्वत्रतवासादितिभावः ५२ तस्मात्सीतयासमंधिया

स्थानमुत्तमं तवापिसर्वभूतानिनिवाससदनानिहि ५२

नियतमंदिरं सर्वदावासस्थानं समदृष्टीनां मित्रोदासीनशत्रुष्विति शेषः अत एवाद्वेष्टृणां तेषां हृदयं ते धिकं सर्वोत्कृष्टं मंदिर
मित्यर्थः सर्वदातत्रवासादेवेति भावः ५४ धर्माधर्मानुविहितनिषिद्धसकलकर्माणि सत्त्का पत्त्वामेव भजते तस्य हृत्तु हृद
यं सीतया सह वस्तु हे राम ते तव सुखमंदिरं सुखजनकं गृहं ५५ निर्द्वंद्वोहंममेति द्वंद्वरहितो तएव निस्पृहः ५६ नानावि

एवं साधारणं स्थानमुक्तं ते रघुनंदन सीतया सहितस्येति विशेषं पृछतस्तव ५३ तद्वक्ष्यामि र
घुश्रेष्ठ यत्ते नियतमंदिरं शांतानां समदृष्टीनामद्वेष्टृणां च जंतुषु त्वामेव भजतां नित्यं हृदयं तेधि
मंदिरं ५४ धर्माधर्मान्परित्यज्य त्वामेव भजतो निशं सीतया सह ते राम तस्य हृत्सुखमंदिरं ५५
त्वन्मंत्रजापको यस्तु त्वामेव शरणं गतः निर्द्वंद्वो निस्पृहस्तस्य हृदयं ते सुमंदिरं ५६ निरहंकारिणः
शांता ये रागद्वेषवर्जिताः समलोष्टाश्मकनकास्तेषां ते हृदयं गृहं ५७ त्वयि दत्तमनोबुद्धिर्यः संतु
ष्टः सदा भवेत् त्वयि संत्यक्तकर्मा यस्तन्मनस्ते शुभं गृहं ५८ यो न द्वेष्ट्यप्रियं प्राप्य प्रियं प्राप्य न
हृष्यति सर्वं मायेति निश्चित्य त्वां भजेत्तन्मनो गृहं ५९

धप्रकारेण तत्त्वज्ञलक्षणान्याह निरहंकारिण इति शांताः शमशीलाः लोष्टं मृत्पिंडः अश्मानः पद्मरागादयः कनकं चैतेस्समनुपादेय
त्वेन येषां ते ५७ मनः संकल्पविकल्पात्मकं बुद्धिर्निश्चयात्मकाहृदयमपि येन त्वय्येव दत्तं त्वद्विषयमेव यस्य संकल्पादिकमिति या
वत् संतुष्टः कथंचिदशनाछादनालाभात्संतुष्टः त्वयि संत्यक्तकर्मा त्वदर्पणबुध्या रतकर्मा सत्त्कत्वाप्यकर्मेति यावत् ५८ अप्रिय

दुःखं द्वेषहर्षाभावयोर्हेतुः सर्वत्र मायामयत्वनिश्चयः ५९

भावादिविकारानितिभावोत्र जन्मतेनजन्मसत्ताविपरिणामवृद्ध्यापक्षयविनाशरूपान् विकारान्योदेहेपशुपतिनात्मनि
तंनित्यं वृद्धिक्षयरहितं अविनाशिनं पशुपतीत्यर्थः ६० क्षुत्तृड्भयंप्राणस्यसुखादिर्बुद्धेरितिविवेकः ६१ संसारधर्मैस्त
त्प्रयोजकैर्धर्मैःपुण्यपापैः ६२ सर्वगुहाःअन्नमयप्राणमयमनोमयविज्ञानमयानंदमयरूपास्तद्रूपोपआशयः

अज्ञावादिविकारान्योदेहेपशुपतिनात्मनि सुखदुःखभयंदुःखंप्राणबुद्ध्योर्निरीक्ष्यते ६० संसार
धर्मैर्निर्मुक्तस्तस्यतेमानसंस्पृहे पशुपतिर्यःसर्वगुहाशयस्थंतं चिद्घनंसत्समनंतमेकं अलेपकंसर्वग
तंवरेण्यंतेषांहृदब्जेसहसीतयावस ६२ निरंतराभ्यासदृढीकृतात्मनांत्वत्सारसेवापरिनिष्ठितानां त्व
न्नामकीर्त्याहतकल्मषाणांसीतासमेतस्यगृहंहृदब्जे ६३ रामत्वन्नाममहिमावर्ण्यतेकेनवाकथं
यत्प्रभावादहंरामब्रह्मर्षित्वमवाप्तवान् ६४ अहंपुराकिरातेषुकिरातैःसहवर्धितः जन्ममात्रद्विजत्वंमे
शूद्राचाररतःसदा ६५ शूद्रायांबहवःपुत्राउत्पन्नामेजितात्मनः ततःचौरैश्चसंगम्यचोरोहमभवंपुरा
६६

स्थानेतत्स्थंचिद्घनंचैतन्यरूपंसर्वगतमप्यलेपकंनभवतिलेपकंतत्सर्वेयस्मतंतत्रस्थितोपितद्गुणास्पृष्टइत्यर्थः ६२ निरंत
रंध्यानाभ्यासेनत्वय्येवदृढीकृतस्वदेकविषयीकृतआत्माचित्तंयेषांत्वत्सारसेवापरिनिष्ठितानांतत्परायणा ६३ त्वन्नामम
हिमावर्णनस्यप्रकारःकृतश्चिदुर्लभइत्याहरामेति ६४ अतेवार्थेस्वविषयमितिहासमाह अहमितिकिरातेषुतद्देशेषु
जन्ममात्रद्विजत्वंजन्ममात्रेणद्विजत्वमित्यर्थः तत्रैवोपपत्तिमाहशूद्राचाररतइति ६५ अजितात्मनइतिच्छेदः ६६ श्री॰

जीवानामंतकोपमोऽभवमित्यन्वयः ६७ ६८ अब्रुवंतानितिशेषः ६९ ७१ पृथक्पृथक्पुत्रभार्यादीनेकैकेनपृष्टेस
र्थः ७२ यावदागमिष्यसितावद्वयंस्थास्यामहे इतिनिश्चियइत्यर्थः ७३ फलभागिनस्तेनलब्धधनादिभोगभाजः ७४
जातनिर्वेदःतादृशाकर्मकृत्वात्मनिजातापमानंवुद्धिविचार्यएतेपुत्रादयोनकुत्राप्युपकर्तारइतिविचार्यऋषिसन्निधंपुनराग

धनुर्बाणधरोनित्यंजीवानामंतकोपमः यकदामुनयःसप्तदृष्टामहतिकानने ६७
सप्तास्तपसाप्रकाशंतोज्वलनाकसमप्रभाः तानब्धविलोभेनतेषांसर्वंपरिछदान् ६८ ग्रहीतुकाम
मस्तत्राहंतिष्ठतिष्ठेतिचाब्रुवन् दृष्ट्वामांमुनयोपृछन्किमायासिद्विजाधम ६९ अहंतानब्रुवंकिंचि
दाद्यातुंमुनिसत्तमाः पुत्रादारादयःसंतिबहवोमेवुभुक्षिताः ७० तेषांसंरक्षणार्थायचरामिगिरि
काननात् ततोमामूचुरव्यग्राःपृछ्यतांवकुटुंबकं ७१ योयोमयाप्रतिदिनंक्रियतेपापसंचयः यूयंत
स्यागिनःकिंवानेतिवदतिपृथक्पृथक् ७२ वयंस्थास्यामहेतावदागमिष्यसिनिश्चयः तथेत्युक्त्वा
गृहंगत्वामुनिभिर्यदुदीरितं ७३ अपृछंपुत्रदारादीनतैरुक्तोहंरघूत्तम पापंतवैवतत्सर्वंवयंतुफ
भागिनः ७४ तदाकर्ण्यजातनिर्वेदोविचार्यपुनरागमं मुनयोयत्रतिष्ठंतिकरुणापूर्णमानसाः ७५
मुनीनांदर्शनादेवशुद्धांतकरणोभवं धनुरादीन्परित्यज्यदंडवत्पतितोस्म्यहं ७६ रक्षध्वंमांमु
निश्रेष्टागछंतिनिरयार्णवं इत्यग्रपतितंदृष्ट्वामामूचुर्मुनिसत्तमाः ७७ उत्तिष्ठोत्तिष्ठभद्रंतेस
फलःसत्समागमः उपदेक्ष्यामहेतुभ्यंकिंचित्तेनैवमोक्ष्यसेपरस्परंसमालोच्यदुर्वृत्तोयंद्विजाधम उपे
सएवसद्धर्मैस्तथापिशरणंगतः ७९

मंआगतः ७५ शुद्धांतःकरणःमलिनवृत्तिरहितः ७६ ७७ सतांसाधूनांसमागमःसफलःमोक्षरूपफलजनकःतदेवा
हउपदेक्ष्यामहेतेनैवमोक्ष्यसेसंसारदुःखादितिशेषः यद्यपिदुर्वृत्तस्तथापिरक्षणीयइत्युत्तरेणान्वयः ७८ ७९

मत्यस्तानि विपरीतपौर्वापर्याणि अक्षराणि यस्मिन् तादृशं रूपं यस्य तत्तेन नामजपे सन्वयः तदाकारेति एकाग्रमनसेति जपेतिकर्त्तव्यतोपदेशः अत्र मनस एकाग्रतावर्णविषयेव ८० ८१ अत्र मकालजपमात्रस्यैव फलमाह वाह्यं विस्मृतवानिति

